॥ षट्प्रश्नटीकाप्रारंभः ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिःॐ ॥ पांतुनःपद्मनाभस्यश्रीपदांबुजरेणवः । कमलाकबरीभारसुरभीकरणोद्यताः ॥ इहखलु संसारपारावारेनिपतितमधिकारिजनं जननीतनयमिव परमात्मतत्वज्ञानप्लवेनो द्दिधीर्षुरियमाथर्वणीब्राह्मणोपनिषत् इतिकर्तव्यतामंतरेणनतत्वज्ञानकारणतामापद्यते। अतःतदितिकर्तव्यतारूपन्यायगर्भभाष्यं करिष्यन्नाचार्यः प्रारिप्सितपरिसमाप्त्यादिप्रयोजनामेतदुपनिषत्प्रतिपाद्यदेवताप्रणतिमादौनिबध्नाति ॥ नमइति ॥ नानिर्धारि तस्वरूपस्यप्रणामोयुक्तः । नचांतरेणलक्षणंवस्तुनिर्धारणमित्यतो वासुदेवस्यलक्षणमाह ॥ प्राणादीति ॥ वक्ष्यतेहि समिथुन मुत्पादयते रयिंचप्राणंचेत्यादिना । नचप्राणादिजननेनास्यकिमपिप्रयोजनंशंकनीयं पूर्णानंदत्वादित्याह ॥ अमंदेति ॥ एतच्च यत्तच्छांतमजरमित्यादिना । नचैवंप्रवृत्त्यनुपपत्तिः। तत्स्वाभाव्यादितीष्णुच्प्रत्ययेनोक्तं। एतदप्युत्पादयतइतिवर्तमानापदेशेन । प्राणादिप्रभविष्णुनासर्वज्ञेनभवितव्यं तदप्यस्तीत्याह ॥ वेधसइति ॥ इदमपि एषहिद्रष्टेत्यादिना । अत्रचभगवान्वासुदेवए वोपनिषत्प्रतिपाद्यः प्राणादयस्तुतच्छेषतयेतिसूचितं । अमंदानंदसांद्रताकथनेनपरमानंदाविर्भावलक्षणमुपनिषदुत्पादितज्ञानफ लंच । तंयथायथोपासतेतदेवभवतीत्यादिश्रुतेः । वक्ष्यतिच तेषामसौविरजोब्रह्मलोकइति । अतोयुक्तमेव विषयप्रयोजनवदेत दुपनिषदोव्याख्यानमिति । अथ प्रजेत्यादिवाक्यव्याख्यानमपव्याख्याप्रत्याख्यानंचलाघवेनचिकीर्षुः संक्षेपतस्तावत्प्रथमप्रश्न

भा० । ॐ नमोभगवतेतस्मैप्राणादिप्रभविष्णवे ॥ अमंदानंदसांद्रायवासुदेवायवेधसे ॥ १ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्रतिवचनसमाख्यारूपांस्मृतिमेवपठति ॥ प्रजानामित्यादिना ॥ अत्रादौसुकेशाइत्याद्याख्यायिका विद्याप्रशंसयाश्रोतृणांश्रद्धाद्यतिशयजननार्था । एवंकिलमहद्भिर्भारद्वाजप्रभृतिभिरपीयंविद्या सांवत्सरब्रह्मचर्यादिनालब्धाऽतोतिप्रशस्ततरा अस्माभिरप्येवंविधैर्भाव्यमिति । स्मर्यतेहिश्रद्धादीनांतत्वज्ञानहेतुत्वं श्रद्धावाँल्लभतेज्ञान [गीता ४ । ३९] मिति ॥ तत्रेयमक्षरयोजना ॥ सुकेशानामतः भरद्वाजस्यापत्यंभारद्वाजः । शिबेरपत्यंशैब्यः सत्यकामोनामतेः । सूर्यस्यापत्यंसौर्यः तदपत्यंसौर्यायणिः । दीर्घःसुलोपश्छांदसइति सएवसौर्यायणी । गर्गस्यगोत्रोगार्ग्यः । कौसल्योनामतः कोसलायांभवोवा । अश्वलायनस्यापत्यंआश्वलायनः । भृगोरपत्यंभार्गवः विदर्भेषुभवोवैदर्भिः । कबंधीनामतः कत्यस्यापत्यंकात्यायनः इतरेतरयोगेचशब्दाः। तएतेहकिलब्रह्मपराः वेदाभ्यासेतात्पर्यवंतः ब्रह्मनिष्ठाः तदुक्तानुष्ठाननिष्ठाश्चमुनयः कदाचित्समवेताः परंब्रह्मवासुदेवमन्वेषमाणाजिज्ञासवो बभूवुरितिशेषः । ब्रह्मपराइत्यादि ब्रह्मजिज्ञासाधिकारसंपत्तिकथनं । ततस्तेकिलैषपिप्पलादो यद्वयंप्रक्ष्यामस्तत्सर्ववक्ष्यति तस्मादेनंप्रतिगच्छामइतिनिश्चित्यसमित्पाणयोभूत्वा भगवंतं पूज्यं । पिप्पलादमुपसन्नाः तत्समीपंप्राप्ताः । हवैशब्दःपिप्पलादस्यप्रश्नप्रतिवचनसामर्थ्यप्रसिद्धिद्योतकः ॥ १ ॥ तानागतान्हकिलसऋषिःपिप्पलादउवाच । किमिति । यद्यपियू

टीका. प्रश्न. १ ॥ २ ॥

उप० । सुकेशाचभारद्वाजः शैब्यश्चसत्यकामः सौर्यायणीचगार्ग्यः कौसल्यश्चाश्वलायनः भार्गवोवैदर्भिः कबंधीकात्यायनः । तेहैतेब्रह्मपराब्रह्मनिष्ठाःपरंब्रह्मान्वेषमाणाएषहवैत त्सर्ववक्ष्यतीतितेहसमित्पाणयोभगवंतंपिप्पलादमुपसन्नाः ॥ १ ॥ तान्हसऋषिरुवाच ।

SGDF Sri Gargeshwari Digital Foundation

यंप्रागेवतपआदिसंपन्नास्तथापि भूयःपुनरेव तपसासर्वेंद्रियनिग्रहलक्षणेन विशेषतोपिब्रह्मचर्येण श्रद्धयाऽऽस्तिक्यनिष्ठयाच युक्ताः संवत्सरमेकमस्मान्परिचरंतःसंवत्स्यथ सम्यग्वसत । ततोयथेष्टंप्रश्ना न्प्रष्टव्यार्थान्पृच्छत । युष्माभिःपृष्टंचप्रतिवक्तुंयदि वयंविज्ञास्यामः तर्हिसर्ववोयुष्मभ्यंवक्ष्यामइति । नह्येवंसति अवचनेकारणमस्तीतिहशब्दः ॥ २ ॥ अथतदुक्तनियमानुष्ठानसम नंतरं । तेषांमध्येकबंधीकात्यायनउपेत्योपसदनंकृत्वा पिप्पलादंपप्रच्छ । पाठक्रमादर्थक्रमोबलीयानितिपश्चादुक्तस्यापिकात्याय नस्यप्रश्नःप्रतिवचनंचप्रथममुक्तं । एवमन्यत्रापिद्रष्टव्यं । तंच क्रमंतत्रैवदर्शयिष्यामः । किमिति । भगवन्कुतोनिमित्तकारणात् पुरुषादिमादेवाद्याःसर्वाःप्रजाउत्पद्यंतइति । हवाइतिप्रजानांप्रजननस्यसुप्रसिद्धताद्योतकौनिपातौ । सुप्रसिद्धंतावत्प्रजानांप्रज ननं।नचैतदंतरेणकारणमुपपन्नं।सर्वदापिप्रसंगात्।नचाचेतनैरेवकारणैःचेतनानधिष्ठितानांकार्यकरत्वादर्शनात्।नचजीवोधिष्ठाता। अस्वतंत्रत्वात् । नापीश्वरः । तदनुपलंभादितिप्रश्नाशयः।यद्यपिनभगवान्सर्वेषांप्रत्यक्षगोचरोवर्तमानः कुलालइवघटंप्रजाःजनय ति । तथापिजगत्कारणीभूतान्प्राणादीनुत्पाद्य तेष्वाविश्यतान्निमित्तीकृत्यनिखिलाःप्रजाजनयतीतिनकश्चिद्विरोधइत्यभिप्राय वांस्तस्मैपृष्टवतेकात्यायनायसपिप्पलादःकिलोत्तरमुवाच। किमिति। प्रजानांब्रह्मादीनांपतिःपालकःपरमेश्वरः कल्पादौकिलात्मनः प्रजाकामो देवादिप्रजावत्त्वमात्मनइच्छन्नवर्तत अथससर्वज्ञोपिलोकविडंबनायतपोतप्यत कर्तव्यमन्वालोचयत् ॥ ३ ॥ आलो

उप० । भूयएवतपसाब्रह्मचर्येणश्रद्धया संवत्सरंसंवत्स्यथ । यथाकामंप्रश्नान्पृच्छत । यदिविज्ञास्याम:सर्वंहवोवक्ष्यामइति ॥ २ ॥ अथ कबंधीकात्यायनउपेत्यपप्रच्छ । भगवन्कुतोहवाइमाःप्रजाःप्रजायंतइति । तस्मैसहोवाच । प्रजाकामोहवैप्रजापतिः । सतपोतप्यत ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

चितकार्यश्चसप्रजापतिर्मिथुनंस्त्रीपुरुषरूपंद्वंद्वमुत्पादयते उदपादयत् । किंतत् । रयिं वित्ताभिमानिनींभारतीं । प्राणं मुख्यंचेत्येतत् । ननुसर्वाःप्रजाःसिसृक्षुःपरमेश्वरःकथंतौउदपादयदिति । एवंमन्यतेस्मप्रजापतिः एतौरयिप्राणौमेममबहुविधाःप्रजाःकरिष्यतइति । एतावाविश्याहंप्रजाःस्रक्ष्यामिइमौप्रजासर्जनेममनिमित्तीभविष्यतइति । अभूतांचतौप्रजापतेःप्रजासर्गेनिमित्तमित्युच्यते ॥ **आदित्यइत्यादिना** ॥ ततोसौप्राणःप्रजापतिनाआदित्यादिषुसृष्टेष्वादित्यःआदित्यनामाआदित्यंप्रविष्टोबभूव । रयिरेवरयिरपि । चंद्रमाःचंद्रमानाम्नी चंद्रमसमाविष्टाबभूव । एवंसूर्याचंद्रगतौतावाविश्य तौनिमित्तीकृत्य प्रजापतिःप्रजाःससर्जेतिवाक्यशेषः ॥ ४ ॥ तदेतदाह ॥ **प्रजानामिति** ॥ सूर्याचंद्रनामानौतौसूर्याचंद्रगतौचकारेतियोज्यं । प्रकारांतरेणतयोःप्रजोत्पत्तिनिमित्तत्वमुच्यते ॥ **रयिर्वाइत्यादिना** ॥ एतत्सर्वंरयिर्वै प्रमाणप्रसिद्धमेतत् । किंतत्सर्वं । मूर्ततेजोबन्नलक्षणं अमूर्तंचप्रकृत्यादिकमितियदुपादानकारणंराशिद्वयं तस्माद्राशिद्वयात्प्रविभक्ता यामूर्तिःयन्मूर्तं सैवरयिः । सप्तम्यर्थेवापंचमी । अमूर्तंप्राणइतिशेषः । प्रकृत्यादिषुस्थित्वातेषामुपादानत्वशक्तिंप्रेरयंतौतौप्रजापतेःप्रजोत्पत्तौनिमित्तंभवतइतियावत् । तदिदमाह ॥ **अमूर्तस्थइति** ॥ तावाविश्येतिसर्वत्रसंबध्यते । आदित्येस्थित्वाप्राणःप्रजोत्पत्तिनिमित्तंभवतीत्युक्तं । तत्कथमिति उच्यते

उप० । समिथुनमुत्पादयते । रयिंचप्राणंचेत्येतौमेबहुधाप्रजाःकरिष्यतइति । आदित्योहवैप्राणोरयिरेवचंद्रमाः ॥ ४ ॥ रयिर्वाएतत्सर्वंयन्मूर्तंचामूर्तंच । तस्मान्मूर्तिरेवरयिः ।

॥ अथेत्यादि ॥ अथशब्दःप्रकृतमूर्तादिप्रसंगादर्थांतरद्योतकः । आदित्यःआदित्यस्थःप्राणः उदयन्उद्गच्छन् प्राचींदिशं प्रकाशेनप्रविशतीतियत्तेन प्राच्यान्प्राणान्स्वरश्मिषुसन्निधत्तेसंनिवेशयति । स्वरश्मिभिस्तान्व्याप्नोतीतियावत् । एवंदक्षिणांदिशंप्रविशतीतियत्तेनदक्षिणान्प्राणान्स्वरश्मिषुसन्निधत्तइत्यादियोज्यं । दिशोंतरादशदिशांमध्ये । अवांतरदिशांप्राच्यादिग्रहणेनैवगृहीतत्वात् । अन्यथाप्राच्यान्प्राणानित्यादिबहुवचनायोगात् । यत्सर्वमितिनिगमनं ॥ ५ ॥ अनेनाशेषजगत्प्रकाशकतयाप्रजोत्पत्तिनिमित्तत्वमुक्तं । नकेवलमेतावत् । किंनाम सएषआदित्येस्थितोविश्वरूपःपूर्णरूपो ऽदनादग्निः प्राणोवैश्वानरोविश्वनरसंबंधीतापनपाचनशोषणादिनासर्वप्रजोत्पत्तिहेतुःसन्नुदयते । आदित्योहवैप्राणइतियाप्रसिद्धिःसूचितासोच्यते ॥ तदेतदिति ॥ यदुक्तंतदेतदृचाविश्वरूपमितिमंत्रेणाभ्युक्तंस्पष्टमुक्तमतोदृढतरंप्रतिपत्तव्यमिति । विश्वरूपं । कराःरश्मयोस्यसंतीतिकरी तंकरिणं । जातवेदसंजातस्यसर्वस्यवेदितारं । परायणंसर्वप्राणिनांपरमाश्रयं । एकंप्रधानं । ज्योतिःप्रकाशकं । तपंततपनक्रियांकु

उप० । अथादित्यउदयन्प्राचींदिशंप्रविशतितेनप्राच्यान्प्राणान्रश्मिषुसन्निधत्ते ।

भा० । प्रजानांपालनाद्विष्णुःप्रजापतिरितीरितः । सवायुंसूर्यनामानंचंद्रनाम्नींसरस्वतीं । सूर्याचंद्रगतौदेवःससर्जपुरुषोत्तमः । तावाविश्वस्वयंविष्णुःसर्वसृष्टीःकरोत्यजः । अमूर्तस्थःसवायुस्तुमूर्तसंस्थासरस्वती ।

उप० । यद्दक्षिणांयत्प्रतीचींयदुदीचींयदधोयदूर्ध्वंयदंतरादिशोयत्सर्वंप्रकाशयतितेनसर्वान्प्राणान्रश्मिषुसन्निधत्ते ॥ ५ ॥ सएषवैश्वानरो (विश्वरूपः) प्राणोग्निरुदयते । तदेतदृचाभ्युक्तं । विश्वरूपंकरिणंजातवेदसंपरायणंज्योतिरेकंतपंतं ।

SGDF
Sri Gargeshwari Digital Foundation

र्वैतं । उपलक्षणंचैतत् । शोषणादिकंचकुर्वाणमादित्यमंडलस्थंपुरुषंजानीयात् । किमिति । सहस्ररश्मिरनंततेजाः । शतधानंत रूपैः । सर्वप्राणिषुवर्तमानोयःप्राणएषप्रजानामुत्पत्तयेसूर्येस्थित्वोदयतीति । तदेतदाह ॥ **आदित्यस्थइति** ॥ प्राणान्प्राच्यादी नात्मनिस्वरश्मिषुसंनयेत् । सन्निवेशयतीत्यर्थः । केतेप्राच्यादयःप्राणाइति । तत्तद्दिग्गतप्राणिप्रणयनादिंद्रादयोदिक्पालाएवे त्याह ॥ **प्राच्याःप्राणाइति** ॥ तथाशब्दोवक्ष्यमाणदक्षिणादिसमुच्चयार्थः । कथंतेषुबहुवचनमित्यतआह ॥ **सभार्याइति** ॥ सभार्यैरन्यादिभिःकोणपैःसार्धमिंद्रादयइत्यर्थः । यदधइत्यादौनैतत्संबध्यते । सभार्याइत्येव । अतस्तत्रबहुवचनसंपादनाय शे षमित्राविल्यादिद्वयोरुक्तिः । दिङ्मध्यस्थाअपिकेचिज्ज्ञातव्याः । एवंचंद्रमसिस्थितायादेव्याअप्योषधिजननादिद्वारेणप्रजोत्पत्ति निमित्तत्वमुपपादनीयमिति ॥ ६ ॥ अथसर्वोत्पत्तिनिमित्तकारणंसंवत्सरादिलक्षणंकालं तदवांतरभेदोत्तरायणाद्यधिष्ठातारौरयि प्राणौचाधिष्ठाय प्रजापतेःप्रजाकारणत्वमुच्यते ॥ **संवत्सरइति** ॥ प्रजापतिःसंवत्सरोवै संवत्सरस्थःसन्प्रजाजनयतीतिप्रसिद्धं । तस्यसंवत्सरस्ययेअयनेसूर्यगतिविशेषोपलक्षितौदेवयानपितृयानलक्षणदेवताविशेषाभिमतौभागविशेषौ नामतोदक्षिणंचोत्तरंच

उप० । सहस्ररश्मिःशतधावर्तमानःप्राणःप्रजानामुदयत्येषसूर्यः ॥ ६ ॥

भा० । आदित्यस्थःसवायुस्तुप्राणानात्मनिसन्नयेत् । प्राच्याःप्राणास्तथेंद्राद्यादक्षिणाश्चयमादयः । प्रतीच्यावरुणाद्यास्तुसोमाद्याउत्तराः स्मृताः । शेषमित्रावाचीनौवींद्रकामावुदक्तनौ । सभार्याःकोणपैःसार्धंचत्वारोदिशिदिश्यपि ।

उप० । संवत्सरोवैप्रजापतिः । तस्यायनेदक्षिणंचोत्तरंच ।

SGDF Sri Gargeshwari Digital Foundation

तयोरयिप्राणावधिष्ठातारावितिशेषः। कुतएतदिति। उच्यते॥तद्यइत्यादि॥तत्तत्रसाधकेषुयेऋषयःप्रजाकामामोक्षेतरफलकामाः संतइतियावत्। इष्टंयजनं पूर्तमन्नप्रदानादिकं कृतमन्यच्चकर्मेत्येतदुपासतेऽनुतिष्ठंति। तएतेदक्षिणंपितृयाणंप्रतिपद्यंते। प्रतिपन्नाश्चतेचांद्रमसमेवलोकमभिजयंतेप्राप्नुवंति। तएवपुनःस्वकर्मावसानेतस्माच्चंद्रलोकादावर्ततेहवै। यतएवंपितृयाणेनगतानांपुनरावृत्तिमच्चंद्रलोकप्राप्तिलक्षणंफलंप्रसिद्धं। तस्माच्चंद्राधिष्ठात्रीरयिरेवैषःयःपितृयाणोवैपितृयाणाधिष्ठात्रीतिगम्यते॥७॥ अथयेमुमुक्षवस्तपआदिसाधनैःपरमात्मानमन्विष्यविचार्यविदित्वाचोत्तरेणगतास्तआदित्यमभिजयंतेततश्चपरमंब्रह्म। यस्मादेतद्वै देवयानेनप्राप्यंपरंब्रह्मैव प्राणानामिंद्रादीनामायतनमाधारःएतदेवामृतमभयंचैतदेवपरायणं मुक्तानामप्याश्रयोऽतएतस्मान्नपुनरावर्तते। इतितस्मादपुनरावृत्त्ययोग्यानांमार्गनिरोधकत्वादेवैषआदित्यो निरोधोऽविदुषामित्युच्यते श्रुत्यंतरइति। यतएवमुत्तरायणेनगतानामपुनरावृत्त्याऽऽदित्यप्राप्तिलक्षणंफलंप्रसिद्धं तस्मादादित्याधिष्ठिताप्राणएवोत्तरायणाधिष्ठातेतिज्ञायतइतिवाक्यशेषः। आदित्यंप्राप्तानामपुनरावृत्तिरित्यत्रश्रुत्यंतरसंमतिरुक्ता॥ तदेषइति॥ यच्चोक्तं केचित्पितृयाणेनयांति केचिद्देवयाननेनेति त

उप०। तद्येहवैतदिष्टापूर्तेकृतमित्युपासतेतेचांद्रमसमेवलोकमभिजयंते। तएवपुनरावर्ततेतस्मादेतेऋषयःप्रजाकामादक्षिणंप्रतिपद्यंते। एषवैरयिर्यःपितृयाणः॥ ७॥ अथोत्तरेणतपसाब्रह्मचर्येणश्रद्धयाविद्ययाआत्मानमन्विष्यादित्यमभिजयंते। एतद्वैप्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्नपुनरावर्ततइत्येषनिरोधः। तदेषश्लोकः।

SGDF
Sri Gargeshwari Digital Foundation

त्रैषवक्ष्यमाणःश्लोकोमंत्रः संमतित्वेनभवति। हेमंतशिशिरयोरैक्येनपंचर्तवस्तदभिमानिनःपादाअंशायस्यतंपंचपादं । पितरंप्रजानांपोषकं । द्वादशमासाभिमानिदेवताआकृतयोरूपाणियस्यतं द्वादशाकृतिं । विचक्षणंविवेकिनं । सप्तचक्राणिचंक्रम्यतेरथएभिरितिअश्वायस्यासौसप्तचक्रःतस्मिन् । षट्संख्याकाअरायस्यासौषळरःतस्मिन्नर्थेर्पितंवर्तमानमादित्यं दिवोंतरिक्षस्यपरेऽन्यतरस्मिन्किंचिद्दक्षिणाश्रितेऽर्धेभागेगच्छंतं । पुरीषमुदकंतदस्यास्तीतितंपुरीषिणंवर्षणहेतुं । तदुपलक्षितकालाभिमानिदेवतामार्गमितियावत् । केचित्काम्यकर्मिणःस्वप्राप्यमाहुः । अथ तेभ्योऽन्येइमेज्ञानिनःदिवउ परेपरस्मिन्किंचिदुत्तराश्रितेभागेगच्छंतमादित्यं तदुपलक्षितकालाभिमानिदेवतामार्गस्वप्राप्यमाहुरितियावत् ॥ ८ ॥ तदेतदाह ॥ संवत्सरस्थइति ॥ किंचमासोवैप्रजापतिः । मासलक्षणंकालमधिष्ठायप्रजाःसृजतीतियावत् । तस्यमासस्यावयवभूतःकृष्णपक्षएवरयिः । शुक्लपक्षःप्राणः । पक्षद्वयेस्थित्वाप्रजापतेःप्रजोत्पत्तौनिमित्तीभवतइतियावत् । कुतएतत् । यस्मात्खल्वादित्योत्तरायणाधिष्ठाताप्राणःशुक्लपक्षेस्थितः तस्मादेवह्येतेउत्तरायणेनादित्यंजिगमिषंतऋषयःशुक्लपक्षेइष्टिंयजनंनिष्कामंप्राणपूजात्मकंकुर्वंति । यस्माच्चंद्रदक्षिणायनाधिष्ठात्रीरयिःकृष्णपक्षेस्थिता तस्मादेवहीतरेदक्षिणायनेनचंद्रमसंप्रेप्संतऋषयइतरस्मिन्कृष्णपक्षेकाम्यांरयिंपूजारूपामिष्टिंकुर्वंतीतिया

उप० । पंचपादंपितरंद्वादशाकृतिंदिवआहुःपरेअर्धेपुरीषिणं । अथेमेअन्यउपरेविचक्षणंसप्तचक्रेषळरआहुरर्पितं ॥ ८ ॥

भा० । संवत्सरस्थोभगवान्वागीरावयनस्थितौ ।

वत् । तदेतदाह ॥ मासस्थितइति ॥ किंचाहोरात्रेइत्यादिपूर्ववद्व्याख्येयं । तदिदमाह ॥ अहोरात्रेत्विति ॥ एकवद्भाव स्यवैकल्पिकत्वेनश्रुतावहोरात्रेइतिप्रथमा । भाष्येतुसप्तमीतिज्ञातव्यं । प्राणंवाइत्यादिवाक्यंनसाक्षात्प्रकृतेनसंबध्यते । अतोम ध्येकिमपिवक्तव्यं तदाह ॥ दंपत्योरिति ॥ एवंसतितदुपपादकत्वेनास्यसंबंधः । येदिवारत्यारतिहेतुभूतयास्त्रियासंयुज्यंतेसंयो गमाचरंति तएतेप्राणंस्कंदंतिनिर्गमयंति । यत्रक्वचनपरित्यजंति । यद्रात्रौरत्यासंयुज्यंते तदिदंब्रह्मचर्यसममेवेतितावत्प्रसिद्धं । तेनज्ञायतेरात्र्यधिष्ठात्रीरयिःस्त्रियांवर्तते अहरधिष्ठाताप्राणःपुंसीति । तथाहि । दिवापुरुषरेतसिप्राणस्याधिक्यंसन्निधानं । नतदा देव्याः । स्त्रियांतावत् । ततश्चदिवापुरुषरेतसिस्थितेप्राणेस्त्रियंप्राप्तेयत्रक्वचासावनेनत्यक्तोभवति । रात्रौतुस्त्रियांदेव्याअधिक्यं सन्निधानमिति । तदाप्राणःस्वभार्यामेवप्राप्तोवर्ततइत्युपपद्यतइति ॥ ९ ॥ किंचान्नंवैप्रजापतिः । कथमन्नेस्थितस्यप्रजापतेःप्रजा जनकत्वमिति । ततोन्नात्खल्वेतद्रेतोजायते । किंचातः तस्माद्रेतसोहीमामानुषादिप्रजाःप्रजायंतइति । अन्नेस्थित्वाततूरेतोरूपे णपरिणाम्यतदुपादानीकृत्यप्रजापतिःप्रजाःसृजतीतियावत् । एवंपरमेश्वरोनिमित्तोपादानभूतान्पदार्थान्द्वारीकृत्यप्रजाःसृज

भा० । मासस्थितःसभगवान्पक्षयोर्वाक्चमारुतः । अहोरात्रेतुभगवान्प्राणोह्यहनिवाङ्निशि ॥

उप० । मासोवैप्रजापतिः । तस्यकृष्णपक्षएवरयिः । शुक्लःप्राणस्तस्मादेतेऋषयःशुक्लइष्टिंकुर्वतीतरइतरस्मिन् । अहोरात्रेवैप्रजापतिस्तस्या हरेवप्राणोरात्रिरेवरयिः । प्राणंवाएतेस्कंदंतियेदिवारत्यासंयुज्यंते । ब्रह्मचर्यमेवतद्यद्रात्रौरत्यासंयुज्यंते ॥ ९ ॥ अन्नंवैप्रजापतिस्ततोहवैतद्रेतः तस्मादिमाःप्रजाःप्रजायंतइति ।

SGDF
Sri Gargeshwari Digital Foundation

तीतिविदुषःफलमुच्यते ॥तदित्यादिना॥ तत्तत्रप्रजासु येखलुपुरुषास्तदेतद्यथोक्तंप्रजापतेर्व्रतंकर्मचरंतिजानंति तेमिथुनमुत्पाद यंतेसाध्वपत्याभवंति । तेषामेवैषसत्याख्योब्रह्मलोकःप्राप्योभवति । येषांतपोब्रह्मचर्यंचास्ति येषुसत्यंसत्यवचनंप्रतिष्ठितंनियमे नस्थितं । नकेवलमेतावत् । किंतुयावद्ब्रह्मलयंतत्रस्थितानामेवतेषामसौविरजोप्राकृतोब्रह्मलोकोवैकुंठादिःप्राप्योभवति । येषु जिह्मंकौटिल्यमनृतमसत्यवचनंमायाविप्रलिप्सेत्येवमादिदोषानसंति तेषामितिसंबंधः । सत्यवचनादिगुणाभिधानेनसिद्धस्याप्य नृतादिदोषाभावस्योक्तिरादरार्थेति । तदिदमाह ॥ एवमिति ॥ इतिप्रथमप्रश्नप्रतिवचनं ॥ १ ॥ अथहैनंभार्गवः ॥ प्र श्नार्थस्योक्तानंतर्यसूचकोथशब्दः । उक्तंपरमेश्वरस्यसकलप्रजाजनकत्वं । लब्धजन्मनःस्थित्यादीति तदनंतरंस्थितिज्ञानहेतुत्वं वक्तव्यं । प्राक्प्राणस्यवरिष्ठत्वमभिप्रेतं तच्चोपपादनीयमिति तदर्थमुत्तरोग्रंथः । भगवन्कत्येवकियत्संख्याकाः कतरेचदेवाः प्र जाविधारयंते । कतिकतरेचदेवाएतद्विषयजातंप्रकाशयंते । कान्निमित्तीकृत्यपरमेश्वरःप्रजानांस्थितिंविषयप्रकाशंचकरोतीति

उप० । तद्येहवैतत्प्रजापतिव्रतंचरंति । तेमिथुनमुत्पादयंते । तेषामेवैषब्रह्मलोकोयेषांतपोब्रह्मचर्ययेषुसत्यंप्रतिष्ठितं ।

भा० । दंपत्योर्भगवान्विष्णुर्भार्यास्थातुसरस्वती । भर्तृस्थःसस्वयंवायुः

उप० । तेषामसौविरजोब्रह्मलोकोनयेषुजिह्ममनृतंनमायाचेति ॥ १० ॥ इतिप्रथमःप्रश्नः ॥ **प्रथमःप्रश्नः ॥ १ ॥**

भा० । एवंजानन्विमुच्यतइतिप्रजापतिसंहितायां ॥ १ ॥ प्र० ॥

उप० । अथहैनंभार्गवोवैदर्भिःपप्रच्छ । भगवन्कत्येवदेवाःप्रजाविधारयंते । कतरएतत्प्रकाशयंते ।

SGDF
Sri Gargeshwari Digital Foundation

यावत् । एषांधारणप्रकाशहेतूनांदेवानांमध्येकोवावरिष्ठोतिशयेनवरः ॥१॥ पूर्वोक्तरीत्याप्राणेनभाव्यं । तत्कथमित्येवंपृष्टवतेत स्मैसहोवाच।एषआकाश आकाशाभिमानीदेवोहवै यस्त्वयाधारकःपृष्टः।एवंवायुरग्निरित्यादि । अत्रोपलक्षणत्वेनपृथिवीचपृथिवी मात्राचेत्यादिवक्ष्यमाणाःसर्वेपितत्वदेवाग्राह्याः । तेषुचक्षुरादयःप्रकाशहेतवो न्येस्थितिहेतवइतिज्ञातव्यं।उक्तमात्रग्रहणेकःपुनरे षांवरिष्ठइतिप्रश्नाननुगुणःपरिहारःस्यात्। तत्रवायुशब्दस्यप्रधानाप्रधानवायुसाधारण्यादुभयोरपिवक्तव्यत्वात्कोत्राभिप्रेतइतिचिं तायामाह ॥ वायुरिति ॥ भूतप्रकरणत्वादितिभावः । वायाविंद्रइत्यादाविवात्रप्रधानवायुःकिंनस्यात्तस्यापिवक्तव्यत्वादित्यत आह ॥ प्राणशब्देनेति ॥ तान्वरिष्ठःप्राणउवाचेत्युत्तरत्रप्रधानवायुःप्राणशब्देनपरामृश्यते यद्यत्रासौवायुशब्देनप्रकृ(तःस्या) तोनस्यात् । कथंतर्हिप्राणशब्देनपरामृश्येत । नह्येवंबाधकमंतरेणक्वचिदुपलब्धं । लक्षणयापितस्यग्रहणसंभवादिति भावः । नचवाच्यमुभयोरपिवाचकोस्त्विति । उक्तादेवहेतोः । नह्येवंवक्तव्यंसर्वमप्युक्तंस्यात् । येनसकृदुच्चारितस्यशब्दस्यार्थ द्वयंप्रतिपद्येमहीति । एतेषांचप्राणस्यवरिष्ठत्वावधारणायाख्यायिकोच्यते ॥ तेप्राकाश्याइत्यादि ॥ तएतेधारकाःप्रकाशका श्चदेवाःप्राकाश्याःप्रकाशवंतः । अभिअभितःउच्चैरितियावत् । अभिवदंतिकदाचिदन्योन्यंस्पर्धयैवाभ्यवदन् । किमिति । वय

उप० । कःपुनरेषांवरिष्ठइति ॥ १ ॥ तस्मैसहोवाच । आकाशोहवाएषदेवोवायुरग्निरापःपृथिवीवाङ्मनश्चक्षुःश्रोत्रंच ॥

भा० । वायुरग्निरित्यत्रभूतवायुरुच्यते । प्राणशब्देनप्रधानवायुः ॥ २ ॥ प्र० ॥

उप० । तेप्राकाश्याअभिवदंति ।

SGDF
Sri Gargeshwari Digital Foundation

मेतद्वाणंशरीरमवष्टभ्याश्रित्यविधारयामःप्रकाशयामश्चेति । अहमेवस्वातंत्र्येणदेहधारकोनत्वमितिधारकः । अहमेवस्वातंत्र्येणविषयप्रकाशकोनत्वमितिप्रकाशकइतियावत् ॥२॥ तानेवंमन्यमानान्वरिष्ठःप्राणउवाच । किमिति । वयमेवधारकाःप्रकाशकाश्चेत्येवंविधंमोहंमिथ्याज्ञानंमाप्राप्नुत । कुतोयंमोहः । यस्मादहमेवैतदेतस्मिञ्छरीरेपंचधाप्राणादिरूपैरात्मानंप्रविभज्यप्रविभक्तंकृत्वैतद्वाणमवष्टभ्यविधारयामिप्रकाशयामिचेति । तच्छ्रुत्वातेऽश्रद्दधानाअप्रत्ययवंतोबभूवुःकुतएतदित्थमिति । समुख्यप्राणस्तेषांप्रत्यायनायाभिमन्यतइत्यभिमानोदेहस्तस्मादूर्ध्वमुत्क्रमतइव किंचिदूर्ध्वमुदक्रामत्।अथतस्मिन्प्राणेउत्क्रामतिसतीतरेसर्व एवआकाशादिदेवाःशरीरधारणादौस्वस्थितौचासमर्थाउत्क्रमंतेउदक्रामन् । अस्ययादृच्छिकत्वपरिहारायपुनस्तस्मिन्प्राणेप्रतिष्ठमानेशरीरएवप्रतितिष्ठति । सर्वएवदेवाःप्रतिष्ठंतेशरीरेप्रतितिष्ठंति ॥ ३ ॥ किमिव । तत्तत्रलोके यथामधुमक्षिकामधुकराःमधुकरराजानंप्रधानमधुमक्षिकां मधुस्थानादुत्क्रामंतीमनु सर्वाएवोत्क्रामंति तस्यांचप्रतिष्ठितायांसर्वाएवतत्रप्रतितिष्ठंतिएवंवागादयोदेवाइति । इत्थमन्वयव्यतिरेकाभ्यांप्राणस्यवरिष्ठत्वेवधारितेप्रीतास्तेदेवाःत्वमेवसर्वदेवादिषुस्थित्वातन्नामातद्गुणक्रियादिप्रवर्तक

उप० । वयमेतद्वाणमवष्टभ्यविधारयामइति ॥ २ ॥ तान्वरिष्ठःप्राणउवाच । मामोहमापद्यथाहमेवैतत्पंचधाऽऽत्मानंप्रविभज्यैतद्वाणमवष्टभ्यविधारयामीति । तेऽश्रद्दधानाबभूवुः सोभिमानादूर्ध्वमुत्क्रमतइवतस्मिन्नुत्क्रामत्यथेतरेसर्वएवोत्क्रमंते । तस्मिंश्चप्रतिष्ठमानेसर्वएवप्रतिष्ठंते ॥ ३ ॥ तद्यथामधुमक्षिकामधुकरराजानमुत्क्रामंतंसर्वाएवोत्क्रमंते । तस्मिंश्चप्रतिष्ठमानेसर्वाएवप्रतिष्ठंते । एवंवाङ्मनश्चक्षुःश्रोत्रंचेति ।

इतिप्राणंस्तुन्वंतिअस्तुवन् । तदुच्यते ॥ एषोग्निरित्यादि ॥ एषप्राणएवाग्निःसंस्तपति । एषएवसूर्योपिसंस्तपति । मघवान प्येषएवेतिशेषः । पृथिवीरयिश्च य त्सदसन्मूतामूर्तं यच्चामृतंमुक्तजातं तदप्येषएव ॥ ४ ॥ कथमेतत्सर्वंप्राणइति । उक्तंवक्ष्य माणंचवित्रियते ॥ अराइति ॥ तस्मात्सर्वंप्राणइत्युच्यतइतिशेषः । परोक्षतयास्तुतोऽपरोक्षतयास्तूयते ॥ प्रजापतिरित्या दिना ॥ प्रजापतिर्दक्षादिस्त्वमेव । गर्भेचगर्भस्थप्रेरकतयात्वमेवचरसि । प्रतिजायसे जनिक्रियांचत्वमेवकरोषि । हेप्राणेमादेवा द्याःप्रजास्तुभ्यं त्वदीयाः । कुतः । यद्यस्मात्त्वंप्राणैश्चक्षुरादिभिःसहधारणादिकंकुर्वञ्छरीरेप्रतितिष्ठसि तस्मात् । नकेवलंतपनक्रि यावानग्निःप्राणः किंतूच्यते ॥ देवानामिति ॥ त्वंदेवानांवह्नितमोयज्ञभागवाहकतमोसि । पितृणांप्रथमास्वधा मुख्यस्वधावा हकोपित्वमेवासि । त्वमेवाथर्वांगिरसामृषीणांचरितमाचारःसत्यवचनंचासि ॥ ५ ॥ इंद्रस्त्वमितिमघवानित्युक्तविवरणं । तेज सा युक्तइतिशेषः । वायुरित्यस्यविवरणंत्वमंतरिक्षइति । नकेवलंसूर्यस्यतापकत्वंप्राणाधीनं । किंतुज्योतिषांग्रहाणांपतित्वंच । पर्जन्यत्वविवरणं ॥यदेति॥ हेप्राणयदात्वंपर्जन्यरूपोभिवर्षसि । अथ तदा । ते त्वदीया । इमा मानुषादिप्रजाः । कामायय

उप० । तेप्रीताःप्राणंस्तुन्वंत्येषोग्निस्तपत्येषसूर्यएषपर्जन्योमघवानेषवायुरेषपृथिवीरयिर्देवःसदसच्चामृतंचयत् ॥ ४ ॥ अराइवरथनाभौ प्राणेसर्वंप्रतिष्ठितं । ऋचोयजूंषिसामानियज्ञःक्षत्रंचब्रह्मच । प्रजापतिश्चरसिगर्भेत्वमेवप्रतिजायसे । तुभ्यंप्राणप्रजास्त्विमायत्प्राणैःप्रतितिष्ठसि । देवानामसिवह्नितमःपितृणांप्रथमस्वधा । ऋषीणांचरितंसत्यमथर्वांगिरसामसि ॥ ५ ॥ इंद्रस्त्वंप्राणतेजसारुद्रोसिपरिरक्षिता । त्वमंतरिक्षेचर सिसूर्यस्त्वंज्योतिषांपतिः । यदात्वमभिवर्षस्यथेमाःप्राणतेप्रजाः ।

Sri Gargeshwari Digital Foundation

थेष्टमन्नंभविष्यतीतिनिश्चित्यानंदरूपाआनंदवत्यस्तिष्ठंति । हेप्राण त्वंव्रात्योव्रतनिष्ठ एकर्षिरथर्ववेदद्रष्टासि । विश्वस्यात्तासंहर्ता यमादिश्चत्वमसि । सतांपतिःसंश्चासौपतिश्चेतिवासत्पतिस्त्वमसि । वयंतवाद्यस्यभोज्यस्य दातारस्त्वत्पूजकाइतियावत् । कुतःहे मातरिश्व मातरिश्वन् । त्वंनोऽस्माकंपितासि । मातरिश्वनो भूतवायोःपितेतिवा ॥ ६ ॥ एवंस्तुत्वाप्रकृतंतूच्यते ॥ यातइत्यादि ॥ यातेत्वदीयातनूःमूर्तिर्वाचिप्रतिष्ठिता । याश्रोत्रेयाचचक्षुषियाचमनसिसंततासम्यग्व्याप्यवर्तमानाएवमन्येष्वपितत्वेषुया प्रतिष्ठितातांशिवांशांतांकुरु । मोत्क्रमीः वागादिभ्यस्तथोत्क्रमणंमाकार्षीः । वागादिषुप्राणस्यप्रतिष्ठितत्वंकुतः । यतएतत्सर्ववा गादिकंप्राणस्यतववशेवर्तते । नत्वांविनाप्रवर्तितुंक्षमं । नकेवलमध्यात्मंकिंतुत्रिदिवेस्वर्गेयत्प्रतिष्ठितं अधिदैवादिकंचेतियावत् । वागादिषुस्थित्वाचत्वमस्मान्मातापुत्रानिवरक्षस्वपालय । श्रीःश्रियंप्रजाधारणशोभामितियावत् । प्रज्ञांप्रज्ञानंप्रकाशकत्वशक्तिंच नोअस्माकंविधेहिकुर्वितिस्तुन्वंतीतिसंबंधः ॥ ७ ॥ इतिद्वितीयप्रश्नप्रतिवचनं ॥ २ ॥ अथहैनंकौसल्यः ॥ प्रागुक्तंपरमे श्वरोनिखिलजगज्जन्मादिकर्तेत्यादि तद्विवरणार्थोयमुत्तरोग्रंथः । भगवन्कुतः कस्मात्पुरुषा देषउक्तलक्षणः प्राणोजायते । स

उप० । आनंदरूपास्तिष्ठंतिकामायान्नंभविष्यतीति । व्रात्यस्त्वंप्राणैकर्षिरत्ताविश्वस्यसत्पतिः । वयमद्यस्यदातारःपितात्वंमातरिश्वनः॥६॥ यातेतनूर्वाचिप्रतिष्ठितायाश्रोत्रेयाचचक्षुषि । यामनसिसंततताशिवांतांकुरुमोत्क्रमीः । प्राणस्येदंवशेसर्वंत्रिदिवेयत्प्रतिष्ठितं । मातेवपुत्रान्रक्षस्वश्री श्चप्रज्ञांचविधेहिनइति ॥ ७ ॥ **द्वितीयःप्रश्नः ॥ २ ॥** अथहैनंकौसल्यश्चाश्वलायनःपप्रच्छ । भगवन्कुतएषप्राणोजायते ।

SGDF
Sri Gargeshwari Digital Foundation

मिथुनमुत्पादयते रयिंचप्राणंचेत्युक्तमपिपरमेश्वराज्जन्म एवमाढ्यस्यकथंनामसंभवतीत्यभिप्रायः। अहमेवैतत्पंचधाऽऽत्मानंप्रविभज्यैतद्बाणमवष्टभ्यविधारयामीत्युक्तं तत्रकथंकस्मात्कारणात्अस्मिंच्छरीरेप्राणआयातिप्रवर्तते । आत्मानंप्रविभज्यचकथंप्रतिष्ठते प्रतितिष्ठति । केतेविभागा स्तैश्चकिंकुर्वन्कुत्रस्थानविशेषेतिष्ठतीतियावत् । तस्मिन्नुत्क्रांते सर्वेप्युत्क्रांताइत्युक्तं । तत्रकेनप्रविभागेनजीवादीनादायोत्क्रामति । प्राणस्यैतद्वशेसर्वंत्रिदिवेयत्प्रतिष्ठितमित्युक्तं । तत्रकथंकेनरूपेणबाह्यमधिभूतादिकमभिधत्ते धारयति । कथंचाध्यात्ममभिधत्ते ॥ १ ॥ इत्येवंपृष्टवतेतस्मैसहोवाच । यस्मादेवंत्वमतिप्रश्नानतिशयितान्प्रष्टव्यार्थान्पृच्छसि तस्मात्त्वं ब्रह्मिष्ठो वेदविचारादिमानसि । नह्यन्यथैवंविधाःप्रश्नाःसंभवंतीति । यस्माद्ब्रह्मिष्ठोसि तस्मादहंतेतुभ्यमुत्तरंब्रवीमीतितंप्रशस्याद्यप्रश्नोत्तरमुच्यते ॥ आत्मतइति ॥ एष एवंमहामाहात्म्योपिप्राणः आत्मतोजायते । तत्कथं । यथाखल्वेषाच्छाया पुरुषेशरीरे । आतता अत्यंतंशरीराधीनावर्तते । एवमेतस्मिन्नात्मन्येतत्सर्वंप्राणादिकमाततं । प्राणादप्याढ्यतमत्वादात्मनस्ततःप्राणस्यजन्मसंभवत्येवेत्यभिप्रायः । आत्मशब्दस्यानेकार्थकत्वात्कोत्राभिप्रेतइतिनज्ञायते । तस्मादाह ॥ आत्मतइति ॥ नह्यन्यस्यप्राणजनकत्वादिकंसंभवतीतिभावः । द्वितीयप्रश्नस्योत्तरं ॥मनइति ॥ सचायंप्राणोमनोकृतेनमनःकृतेनमनःपरंब्रह्म

उप० । कथमायात्यस्मिंच्छरीरे । आत्मानंवाप्रविभज्यकथंप्रतिष्ठते । केनोत्क्रमते कथंबाह्यमभिधत्तेकथमध्यात्ममिति ॥ १ ॥ तस्मैस होवाच । अतिप्रश्नान्पृच्छसित्रह्मिष्ठोसीति । तस्मात्तेहंब्रवीमि । आत्मतएषप्राणोजायते । यथैषापुरुषेच्छायाएतस्मिन्नेतदाततं ॥ २ ॥ मनोकृतेनायात्यस्मिंच्छरीरे ।

SGDF
Sri Gangeshwar Digital Foundation

तत्कृतेनतन्निमित्तेनतत्प्रेरणयेतियावत् । आत्मनःप्रकृतस्य । मनोनिमित्तेनेच्छयेतिवा आयात्यस्मिंच्छरीरइति । आत्मानंवेत्यादिप्रश्नोत्तररूपे यथासम्राडित्यादिवाक्ये प्राणादिपंचकस्यमुख्यप्राणनियोज्यत्वं ततोभिन्नत्वलिंगंप्रतीयते । पुण्येनपुण्यंलोकंनयतीत्यादिमोक्षदातृत्वादिलिंगेनतेनाभेदोपि । तस्यतन्नियोज्येष्वसंभवात् । अतोव्यामिश्रमिवप्रतीयमानंवाक्यं समंजसीकर्तुमात्मतएषप्राणोजायतइतिवाक्यार्थसहितैतद्वाक्यार्थेसमाख्यास्मृतिमेवपठति ॥ विष्णोरिति ॥ ततश्चैवंयोजनीयं । यत्पृष्टंत्वयाऽऽत्मानंवाप्रविभज्येति तत्रास्तिविवेक्तव्यं । द्विविधंतावत्प्राणादिपंचकं एकंमुख्यप्राणाज्जातं ततोतिरिक्तं अपरंतदात्मकमिति। तत्रयथालोकेसम्राट्सार्वभौमोधिकृतान्नियोगिनोविनियुंक्ते । कथं त्वमेतान्पाटलिपुत्रादीन्ग्रामानधितिष्ठस्व तदाधिपत्येनतिष्ठेत्येकं । अन्यच्च त्वमेतान्कौशांबीप्रभृतीन्ग्रामानधितिष्ठस्वेति । एवमेवैषमुख्यप्राण इतरान्भिन्ना नात्मनोजातत्वादुपचारेणात्मप्रविभागान्प्राणान्वायून्पृथक्पृथगेवस्थानेषुसन्निधत्तेस्थापयति। स्वयंच तत्तत्क्रियाप्रवर्तकतया तत्र प्राणादिपंचरूपोऽवतिष्ठत इत्याशयः ॥ ३ ॥ पृथक्पृथगित्युक्तंविव्रियते ॥ पायूपस्थइत्यादि ॥ पायुश्चोपस्थश्चपायूपस्थं । तत्रमलादेरपनयनादपानंवायु

भा० । आत्मतःपरमात्मतः । विष्णोर्वायुःसमुत्पन्नोवायोःसर्वाश्चदेवताः । प्राणाद्यास्तान्नयन्प्राणआज्ञापयतिराजवत् । स्वयंचपंचरूपः सन्दद्यान्मोक्षादिकंप्रभुरितिप्रभंजने ॥ ३ ॥

उप० । यथासम्राडेवाधिकृतान्विनियुंक्तएतान्ग्रामानधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसन्निधत्ते ॥ ३ ॥ पायूपस्थेऽपानं

मात्मनोरूपेणापानेनाधिष्ठितंसन्निधत्तइतिसंबंधः । चक्षुश्चश्रोत्रंचचक्षुःश्रोत्रं तस्मिन्मुखनासिकाभ्यांसहमुखेनासिकायांचेतियावत् । प्राणःस्वयं मुख्यएव श्वासादिप्रणयनात्प्राणनाम्नारूपेण प्राणवायुमधिष्ठायप्रतितिष्ठति । समानस्तु समाननामानंवायुमधिष्ठाय मध्ये प्राणापानयोर्नाभिदेशइतियावत् । प्रतितिष्ठति ॥ सचैषयस्मादेतद्धुतंभुक्तमन्नंसमं यथाशरीरावयवं नयति तेनसमाननामेतिशेषः । किंतेन । तस्मादन्नस्यसमीकरणादेताः सप्तार्चिषः सप्तज्ञानेंद्रियवृत्तयोभवंति । नन्वात्मैवविषयसंसर्गेण ताननुभविष्यतिकिमिंद्रियवृत्तिभिरिति । मैवं । हृदिह्येषआत्माजीवःस्वरूपेणवर्ततेऽतःकथंतस्याणोर्विषयसंगतिःस्यादिति ॥४॥ व्यानस्यप्रवृत्तिंवक्तुमुच्यते ॥ अत्रेत्यादि ॥ अत्र शरीरे । यदेतदेकशतमेकोत्तरंशतं नाडीनांशिराणां भवति । तासांनाडीनां मध्येएकैकस्यांनाड्यांशतंशतंप्रतिशाखानाड्योभवंति । पुनस्तासांचप्रतिशाखानाड्योभवंतीतिवक्तव्यं । एवंचसंभूय प्रतिशरीरं तासांप्रतिशाखानाडीनां सहस्राणिद्वासप्ततिं जानीयात् । प्रतिशाखानाडीसहस्राणांद्वासप्ततिमितिद्वितीयाषष्ठ्यर्थेयोजनीया । किंचातः । आसुनाडीषु विविधंनयनात्व्यानो व्यानवायुमधिष्ठायचरति । अथोदानस्तूदानवायुमधिष्ठायैकयानाड्या सुषुम्नयोर्ध्वगतिश्चरति । सचतत्रचरन्पुण्येन जीवकृतंपुण्यंनिमित्तीकृत्य । पुण्यं स्वर्गादिलोकं नयति । एवंज्ञानेनमोक्षमितिचद्रष्ट

उप० । चक्षुःश्रोत्रेमुखनासिकाभ्यांप्राणःस्वयंप्रतिष्ठते । मध्येतुसमानः । एषह्येतद्धुतमन्नंसमंनयतितस्मादेताःसप्तार्चिषोभवंति । हृदिह्येषआत्मा ॥ ४ ॥ अत्रैतदेकशतंनाडीनांतासांशतमेकैकस्यांद्वासप्ततिंद्वासप्ततिंप्रतिशाखानाडीसहस्राणिभवंत्यासुव्यानश्चरत्यथैकयोर्ध्वउदानः । पुण्येनपुण्यंलोकंनयति

SGDF
Sri Gargeshwari Digital Foundation

व्यं । अतएवोर्ध्वंनयनादुदानः। पापेनपापंनरकादिकंदुःखबहुलंलोकंनयति उभाभ्यां समप्रधानाभ्यांपुण्यपापाभ्यां समदुःखसुखंमनुष्यलोकं नयतीति ॥ ५ ॥ कथंबाह्यमित्यादिप्रश्नद्वयंपरिहियते ॥ आदित्यइत्यादि ॥ मुख्यप्राणएवहिप्राणनामा बाह्यो बहिर्भव आदित्यआदित्येस्थितः । तन्नामदधत् उदेतिउद्गच्छति । एषआदित्यस्थप्राणएवैनंचाक्षुषंचक्षुषिभवंप्राणवायुमनुगृह्णानोवर्तते । एतेनमुख्यप्राणःप्राणनाम्नारूपेणबहिरादित्यमभिधत्ते।अध्यात्मंचा(दित्यस्थःप्राणः)धिष्ठानभूतेनादित्येनसहैव चक्षुषि स्थित्वाचक्षुस्तदभिमानिनंचप्राणवायुमित्युक्तंभवति । एवमुत्तरत्रापिज्ञातव्यं । बहिःपृथिव्यांयाधारिकापानाख्यादेवतासैषा पुरुषस्यापानं देहेवर्तमानमपानवायुमवष्टभ्यधृत्वांतरा शरीरांतर्वर्तते। अंतरा द्यावापृथिव्योर्मध्ये। यदाकाशो यआकाशः। आकाशधारकःसमानः सोध्यात्मंसमानवायुंधत्तेयोबहिर्वायुधारकोव्यानः सएवांतर्व्यानोव्यानवायुधारकः।बहिस्तेजोधारकोयउदानः सउदानःउदानवायुंधत्तइत्येतत्प्रसिद्धं । कथमिति । यस्मात्तेजोधिष्ठातोदानःतेनाधिष्ठानेनतेजसासहैवांतरुदानंदधत्प्राणिनांजीवनहेतुर्वर्तते । तस्मादेवहियःपुरुषःउपशांततेजाभवति । सतेजसोऽपगमनेनोदानस्याप्यगमनमनुमाय मनसिसंपद्यमानैरिंद्रियैः सह पुनर्भवंजन्मांतरं मरणमितियावत् । प्राप्स्यतीत्यनुमीयतेलोकैःइति ॥ ६ ॥ संगतिविशेषलाभात्केनोत्क्रमतइतिप्रश्नस्योत्तर

उप० । पापेनपापमुभाभ्यामेवमनुष्यलोकं ॥ ५ ॥ आदित्योहवैबाह्यःप्राणउदयत्येषह्येनंचाक्षुषंप्राणमनुगृह्णानः । पृथिव्यांयादेवतासैषापुरुषस्यापानमवष्टभ्यांतरायदाकाशःससमानोवायुर्व्यानस्तेजोहवाउदानः । तस्मादुपशांततेजाःपुनर्भवमिंद्रियैर्मनसिसंपद्यमानैः ॥ ६ ॥

SGDF
Sri Gargeshwari Digital Foundation

मिदानीमुच्यते॥ यच्चित्तइति ॥ एषपुरुषोयच्चित्तोमरणकाले यद्विषयचित्तोभवति तेनतद्विषयेणचित्तेनसहप्राणंमुख्यमायाति तत्समीपंप्राप्नोति । प्राणस्तुतेजसोदानेनयुक्तः परमात्मनासह जीवंयथासंकल्पितं । तेनजीवेनमरणकालेयादृशःसंकल्पितःस्मृतःतथाविधंलोकंशरीरंनयतिप्रापयतीति । अतएवयच्चित्तइत्युक्तं । स्वाभिप्रेतमितिवा । अनेनोदानरूपेणोत्क्रमणमित्युक्तंभवति । एवंभूतप्राणविज्ञानस्यफलमुच्यते ॥ यएवमिति ॥ योविद्वानेवमुक्तलक्षणंप्राणंवेदविजानाति नास्यविदुषःप्रजाहीयते । अविच्छिन्नसंतानोभवतीत्यैहिकं परत्रचामृतोमुक्तोभवति ॥ तदेषश्लोकः ॥ प्राणस्योत्पत्तिंपरमात्मनःआयतिंप्रवर्तनं शरीरेतदिच्छयास्थानमवस्थानं । पायूपस्थादिपंचधाप्राणादिरूपेण विभुत्वं विविधभवनंस्वाम्यंवा । तथाअध्यात्मं अध्यात्मधारकत्वं चशब्देनबाह्यधारकत्वमुत्क्रमणंचेत्येतद्विज्ञायविशेषेणज्ञात्वाऽमृतंमोक्षमश्नुतेप्राप्नोति ॥ ७ ॥ इतितृतीयप्रश्नप्रतिवचनं ॥ ७ ॥ ७ ॥ अथहैनंसौर्यायणी ॥ उक्तंप्राणादेरखिलस्यापिजगतोभगवदधीनत्वं तन्नकेवलंजाग्रदवस्थायां किन्नाम स्वप्नसुषुप्त्योरपीतिदर्शयितुमुत्तरोग्रंथः । भगवन्नेतस्मिन्पुरुषेशरीरिणिस्वपतिसतिकानिदैवानिस्वपंतिस्वव्यापारादुपरमंते । भाव्यंहिकेषांचिद्व्यापारोपरमेण। अन्यथास्वापस्यैवासंभवात् कानिदैवान्यस्मिन्पुरुषेस्वपतिजाग्रतिस्वव्यापारंकुर्वंति । सर्वेषामु

उप० । यच्चित्तस्तेनैषप्राणमायाति । प्राणस्तेजसायुक्तःसहात्मनायथासंकल्पितंलोकंनयति । यएवंविद्वान्प्राणंवेदनहास्यप्रजाहीयतेऽमृतो भवति । तदेषश्लोकः । उत्पत्तिमायतिंस्थानंविभुत्वंचैवपंचधा । अध्यात्मंचैवप्राणस्यविज्ञायामृतमश्नुतेविज्ञायामृतमश्नुतइति ॥ ७ ॥ **तृतीयः प्रश्नः** ॥ ३ ॥ अथहैनंसौर्यायणीगार्ग्यःपप्रच्छ । भगवन्नेतस्मिन्पुरुषेकानिस्वपंति । कान्यस्मिन्जाग्रति ।

SGDF
Sri Gargeshwari Digital Foundation

परमेशरीरावस्थानासंभवात् ।स्वापोपिद्विविधः। स्वप्नसुषुप्तिभेदात् ।तत्रस्वप्नेयएषदेवःस्वप्नान्स्वप्नस्थान्पदार्थान्पश्यतिसकतरः । सर्वेंद्रियाणामुपरतत्वात्केनेंद्रियदेवेनजीवःस्वाप्नान्पदार्थाननुभवतीत्यभिप्रायः। सुषुप्तौचयत्सुखंभवति तत्कस्य । तदोपरतकरण स्यजीवस्यविषयसंसर्गाद्यभावेनकथंसुखानुभवोघटतइत्याशयः । एतेच स्वपंतोजाग्रतःस्वप्नाद्यवस्थावांश्चनतावत्स्वतंत्राः। बहूनां तदयोगात् । नचजीवाधीनाःक्वचिदतद्वशत्वस्यापिदर्शनात् । नचमुख्यप्राणाधीनाः । तस्यापिजीवत्वेनानवस्थितेरसंभवाच्च । अतःपराधीनाएतेसर्वेकस्मिन्संप्रतिष्ठिताभवंति । परमेश्वरश्चेत्तदाश्रयःतत्कुतइत्यभिप्रायः ॥ १ ॥ एवंपृष्टवतेतस्मैसहोवाच ॥ यथेत्यादि ॥ अत्रार्कमरीचीनांयत्तेजोमंडलेऽस्तमयेएकीभावकथनं यच्चोदयेतस्मात्पुनःप्रचारवचनं तदनुपपन्नं । अत्रास्तमये पिदेशांतरेपृथग्दर्शनादिनाऽऽदित्यरश्मीनामुदयास्तमययोरविशेषात् । इंद्रियादिदेवानांचात्रस्वापेवक्तव्ये मनस्येकीभावकथनं कुत्रसंगच्छतेकथंवायुज्यते । नहिभिन्नयोरभेदःक्वचिद्दृष्टः । कथंचमनसःपरदेवत्वमिति । अतएतद्वाक्यंसमंजसयितुं व्याख्या नरूपांस्मृतिमुदाहरति ॥ रश्मीनामिति ॥ सुप्तिगस्यदेवानामिति ॥ तत्तदिंद्रियाद्यभिमानिदेवानामित्यर्थः । सुप्तिगस्यत

उप० । कतरएषदेवःस्वप्नान्पश्यति । कस्यैतत्सुखंभवति कस्मिन्सर्वेसंप्रतिष्ठिताभवंतीति ॥ १ ॥ तस्मैसहोवाच ।

भा० । रश्मीनामविशेषेपिह्यन्यदृष्टिव्यपेक्षया । सूर्यस्यमंडलंयांतीत्युच्यंतेतददर्शनात् । एवंविष्णोस्तुसामीप्याद्देवानांसुप्तिगस्यतु । व्यव हाराकरत्वाच्चैकीभावइतीर्यतइतिच ।

देवानांचेतिवा । ततश्चायमर्थः । हेगार्ग्य यथार्कस्यास्तमदर्शनंगच्छतःसतः सर्वाएवमरीचयःसर्वेपिरश्मयः एतस्मिन्दृश्यमाने तेजोरूपमंडलेएकीभवंति । तत्रैकीभूताइवदृश्यंते । प्रकाशनादिव्यापारादुपरमंतइतियावत् । ताःपुनस्तेतुरश्मयोर्कस्य पुनरुद यतःसतःप्रचरंति । तस्मान्मंडलान्निर्गत्यलोकेप्रचरंतीवदृश्यंते । स्वव्यापारंकुर्वंतीतियावत् । एवंखल्वेतत्सर्वंशरीरीतदिंद्रियदे वताजातंच परेदेवेविष्णौस्वप्नावस्थायांमनसिस्थिते सुषुप्तौतुहृदयाकाशस्थेएकीभवति । जागरेतुप्रचरति । अनेनस्वप्नेमनोव्यति रिक्तानामेवोपरमः । सुषुप्तौतुतस्यापीतिसूचितं । यतएवं तेनकारणेन तर्हितदास्वापे एषपुरुषोजीवो नश्शृणोतीत्यादि नेयायते नगच्छति । स्वप्नविवक्षयाचैतत् । सुषुप्तौतुनमनुतइत्याद्यपिद्रष्टव्यं । यतएवंजीवःस्वापेपरंदेवंप्राप्नोति । अतएवहितदास्वपि तीत्याचक्षतेविद्वांसः । स्वंस्वतंत्रंदेवमप्येतीतिकृत्वेति ॥ २ ॥ कानिजाग्रतीत्यस्योत्तरं ॥ प्राणाग्नयइति ॥ स्वापकालेएतस्मि न्पुरेशरीरेप्राणाःप्राणादिमुख्यप्राणरूपाण्येवाग्नयः प्राणाग्नयएवजाग्रतिशरीरधारणादिस्वव्यापारंकुर्वंति । अग्नयइत्युपलक्षणं ऋत्विग्भावस्यापिवक्ष्यमाणत्वात्कथंतेषामग्न्यादित्वमिति । उच्यते ॥ गार्हपत्यइत्यादि ॥ तेषांप्राणानामेषोपानोगार्हपत्यःपश्चि मत्वसाम्यात् । व्यानोन्वाहार्यपचनोदक्षिणाग्निः होमांगत्वसाम्यात् । यस्माद्गार्हपत्यादाहवनीयःप्रणीयते । प्राणोप्यपानात् ।

उप० । यथागार्ग्यमरीचयोऽर्कस्यास्तंगच्छतःसर्वाएतस्मिंस्तेजोमंडलएकीभवंतिताःपुनरुदयतःप्रचरंत्येवंहवैतत्सर्वंपरेदेवेमनस्येकीभवति । तेनतर्ह्येषपुरुषोनशृणोतिनपश्यतिनजिघ्रतिनरसयतेनस्पृशतेनाभिवदतेनादत्तेनानंदयतेनविसृजतेनेयायतेस्वपितीत्याचक्षते ॥ २ ॥ प्राणाग्नयए वैतस्मिन्पुरेजाग्रति । गार्हपत्योहवाएषोऽपानोव्यानोन्वाहार्यपचनोयद्गार्हपत्यात्प्रणीयते ।

Sri Gargeshwari Digital Foundation

तस्मात्प्रणयनात्प्रणयनसाम्यात्प्राणआहवनीयः । यद्यस्मात्द्वावेतौउच्छ्वासनिश्वासौ तेएवाहुती समंयथाकालंनयति । तस्मादा हुत्योःसमंनयनसाम्यात्समानःसोध्वर्युरितियावत् । तत्रमननान्मनोजीवोयजमानः । पराधीनफलप्राप्तिसाम्यादित्युत्तरार्धवच नं । उदानइष्टफलं यज्ञफलप्रतिपादकउद्गातेतियावत्।फलप्रतिपादकत्वसाम्यात् कथमुदानस्यफलप्रतिपादकत्वंसउदानोह्येनंय जमानंजीवमहरहःप्रतिदिनं सुषाविषियावत् । ब्रह्मसुषुम्नागतं गमयतिप्रापयतीति । यएवंवेद तेनैवमिष्टंभवति । नित्यंब्रह्मप्रा प्तिफलंचतस्यभवतीतिज्ञापनायेदमुक्तं । यतएवंमनोव्यतिरिक्तानामेवोपरमःस्वप्ने तस्माज्जीवस्यमनसास्वप्नदर्शनंयुक्तमिति ॥३॥ तृतीयस्यपरिहारउच्यते ॥ अत्रेत्यादि ॥ अत्रैतस्यामवस्थायांमनोव्यतिरिक्तेंद्रियोपरमेइतियावत् एषदेवोमनोनामा तेनानुगृ हीतोजीवइतियावत् । स्वप्नेमहिमानमात्मनोमहत्त्वमन्यच्चानुभवति तत्रचयमर्थंपश्यतितंप्राग्दृष्टमेवानुपश्यति यःप्राक्श्रुतस्तंश्रु तमेवार्थंशब्दंस्वप्नेनुशृणोति एवमन्यदप्यनुभूतमेवानुभवति नाननुभूतं किमस्मिन्नेवदेशेऽनुभूतमेवानुभवति न किंतुदेशांतरेदि गंतरेचयत्प्रत्यनुभूतंपुनःपुनरनुभूतंतदेवस्वप्नेपुनःपुनःप्रत्यनुभवति । भ्रांत्यातदेवेदमितिप्रत्यभिजानाति । नाप्यस्मिन्नेवजन्म न्यनुभूतमनुभवतीतिनियमः किंत्वस्मिन्जन्मनिदृष्टमदृष्टंचजन्मांतरेदृष्टं एवमुत्तरत्रापि । अनुभूतंअननुभूतमिंद्रियांतरेण ।

उप० । प्रणयनादाहवनीयःप्राणः । यदुच्छ्वासनिःश्वासावेतावाहुतीसमंनयतिससमानोमनोहवावयजमानःइष्टफलमेवोदानः । सएनंयज मानमहरहर्ब्रह्मगमयति ॥ ३ ॥ अत्रैषदेवःस्वप्नेमहिमानमनुभवति । यदृष्टंदृष्टमनुपश्यतिश्रुतंश्रुतमेवार्थमनुशृणोति देशदिगंतरेचप्रत्यनुभूतंपुनःपु नःप्रत्यनुभवति । दृष्टंचादृष्टंचश्रुतंचाश्रुतंचानुभूतंचाननुभूतंच

SGDF
Sri Gargeshwari Digital Foundation

सच्चतदानीमसच्चनिवृत्तंचेत्येवंसर्वंपश्यति । स्वयंचसर्वोनेकप्रकारःसंस्तत्पश्यति ॥ चतुर्थंपरिहर्तुमुच्यते ॥ सयदेत्यादि ॥ एवं स्वप्नेवर्तमानःसजीवोयदातेजसाभगवदीयेनाभिभूतःआवृतोभवति । भगवंतंप्रविशतीतियावत् । अत्रैतस्यांसुषुप्तिसंज्ञायामव स्थायामेषदेवोमनःस्वप्नान्नपश्यति । मनसोप्युपरतत्वान्नजीवःस्वप्नान्पश्यतीतियावत् । यस्मादेवंपरमेश्वरतेजसाभिभूतोभवत्य थतस्मात्तत्सन्निधानसामर्थ्योद्भूतंयत्सुखंतदस्मिंच्छरीरेभवतीतिनकाचिदनुपपत्तिरिति ॥ ४ ॥ अत्रशरीरशब्देनप्रसिद्धंशरीरमे वोच्यतइत्यन्यथाप्रतीतिनिरासायाह ॥ भगवतइति ॥ प्रातीतिकएवार्थःकिंनस्यादित्यतआह ॥ कस्येति ॥ कस्यैतत्सुखंभव तीतिप्रश्नस्यहीदमुत्तरं । नतुकुत्रजीवस्यसुखंभवतीतिप्रश्नोस्ति । येनशरीरेप्रसिद्धेसुखंभवतीतिपरिहारःसंगतःस्यात् । अतःशरी रशब्देनपरेणापिजीवोलक्षणीयः । ततोवरंशरीरशब्दस्तद्वाचकइत्यंगीकरणमितिभावः । ननुप्रसिद्धशरीरस्यैवसुखंभवतु । ततो लक्षणाश्रयणमंतरेणैवप्रश्नानुगुण्यंपरिहारस्यभविष्यतीत्यतआह ॥ नहीति ॥ ननुभवतापिशरीरशब्दस्यजीवेगौणीवृत्तिराश्री यते । यथाभगवच्छरीरंभगवत्सदृशं । एवंजीवोपीतिभगवच्छरीरमुच्यतइत्युक्तत्वात् मयापिशरीरशब्देनशरीरीलक्ष्यतइत्युच्य ते । अतःकोविशेषइत्यतआह ॥ यस्येति ॥ नजीवेशरीरशब्दोगौणोंगीक्रियते । येनाविशेषतःस्यात् । किंनामअबाधितश्रौतप्र

उप० । सच्चासच्चसर्वंपश्यतिसर्वःपश्यति । सयदातेजसाभिभूतोभवत्यत्रैषदेवःस्वप्नान्नपश्यति । अथयदेतस्मिंच्छरीरेसुखंभवति ॥ ४ ॥

भा० । भगवतःशरीरवत्सादृश्ययुक्तेजीवेसुखंभवति । कस्यैतत्सुखंभवतीतिपृष्टत्वात् । नह्यचेतनस्यशरीरस्यसुखंभवति । यस्यात्माशरी रमितिचश्रुतिः ।

SGDF
Sri Gargeshwari Digital Foundation

योगबलात्तद्वाचकएवाभ्युपगम्यते । तथापिजीवादिप्रसिद्धशब्दंपरित्यज्याप्रसिद्धशरीरशब्दोपादाने किंतात्पर्यमितिशंकानिरासायभगवतःशरीरवत्सादृश्ययुक्तेजीवइतितात्पर्यमनेनोक्तं । तथाहि । सुप्तौसर्वेंद्रियाणामुपरतत्वात् किंनिमित्तंसुखं केनजीवोनुभवतीत्यभिप्रायेणपृष्टे परमेश्वरसन्निधानसामर्थ्योद्भूतंसुखमात्मस्वरूपज्ञानेनानुभवतीतिपरिहारोभिप्रेतः । तत्रात्मनोज्ञानस्वरूपत्वज्ञापनाय प्रसिद्धपदपरित्यागेन एतत्पदप्रयोगइतिभावः । स्मृतिसमाख्यानाच्चायमेवार्थइत्याह ॥ सादृश्यादिति ॥ सादृश्यंचज्ञानस्वरूपत्वं । अंतिमप्रश्नपरिहारःसदृष्टांतउच्यते ॥ सयथेत्यादि ॥ सोम्यसोमार्ह सःदृष्टांतः । यथावयांसिपक्षिणोवासोयत्रात्मनां तंवृक्षंसंप्रतिष्ठंते अभिगच्छंति । तमाश्रित्यतिष्ठंतिच । एवंखल्वेतत्सर्वंपृथिव्यादितत्वजातंपरेआत्मनिविष्णौसंप्रतिष्ठते । तदाधारमेववर्ततइति । अत्रपृथिवीत्यादिनापंचमहाभूतान्युच्यंते पृथिवीमात्राचेत्यादिनागंधादिपंचतन्मात्राः चक्षुश्चेत्यादिनादशेंद्रियाणि द्रष्टव्यंचेत्यादिनारूपादितद्विषयाः मनइत्यादिनांतःकरणपंचकं मंतव्यंचेत्यादिनातद्विषयाः तेजःशब्देनचेत

भा० । सादृश्यादेहवज्जीवोविष्णोस्तस्यसुखंभवेत् । सुप्तौतस्यसुखार्थंहिभगवान्सुप्तिमानयेदितिच ॥ ४ ॥ प्र० ॥

उप० । सयथासोम्यवयांसिवासोवृक्षंसंप्रतिष्ठंते । एवंहवैतत्सर्वंपरेआत्मनिसंप्रतिष्ठते । पृथिवीचपृथिवीमात्राचापश्चापोमात्राचतेजश्चतेजोमात्राचवायुश्चवायुमात्राचाकाशश्चाकाशमात्राचचक्षुश्चद्रष्टव्यंचश्रोत्रंचश्रोतव्यंचघ्राणंचघ्रातव्यंचरसनंचरसयितव्यंचत्वक्चस्पर्शयितव्यंचवाक्चवक्तव्यंचहस्तौचादातव्यंचपादौचगंतव्यंचपायुश्चविसर्जयितव्यंचोपस्थश्चानंदयितव्यंचमनश्चमंतव्यंचबुद्धिश्चबोद्धव्यंचाहंकारश्चाहंकर्तव्यंचचितंचचेतयितव्यंचतेजश्चविद्योतयितव्यंच

नागृह्यते सर्वस्यापिसंग्रहः । प्राणोमुख्योधारकस्तेनविधारयितव्यंपृथिव्यादिकंसर्वं ॥ ५ ॥ कथंसर्वस्यतदधीनतेत्युच्यते ॥ एष हीति ॥ चक्षुरादीनामेतेषामेषहिदर्शनादिशक्तिप्रदः । स्वयंचविज्ञानात्माविज्ञानस्वरूपः । सर्वज्ञइतियावत् । पुरुषःपूर्णत्वात् । अतश्चोपपन्नंतस्यसर्वाश्रयत्वमिति ॥ तदस्यविज्ञानात्मनोवेदनस्यफलमुच्यते ॥ सयइति ॥ सविज्ञानात्मापुरुषोयोयादृशलक्षणमेतमेवंविध मच्छायमविद्यारहित मतएवाशरीरं तस्मादेवालोहितं लोहितादिरूपरहितं शुभ्रंशुद्धं । प्राकृतरूपाद्यभावेपिअ प्राकृतशुभ्रादिरूपयुक्तंवा । अतएवाक्षरंनक्षरतीति । हेसोम्ययोवेदयतेविजानातिससर्वज्ञःसर्वप्रधानस्य सर्वकारणस्यच परिज्ञानात्सर्वज्ञइव । तत्सदृशत्वात्सर्वस्यसर्वज्ञएववा । सर्वस्यापिकर्मादेर्ज्ञानस्यफलंपरमात्मज्ञानंप्राप्तमनेनेतिवा । ज्ञानीस्तूयते सर्वं भवति । सर्वपरिपूर्णंपरंब्रह्मतद्भवति । तद्भूतइवतत्प्रविशतीतियावत् । तदेषश्लोकः । विज्ञानात्माविज्ञानस्वरूपोजीवःशरीरेसु खंभवतीतिह्युक्तं । प्राणाश्चक्षुरादयःतद्विषयाश्चरूपादयोभूतानिपृथिव्यादीनितन्मात्राश्च सर्वैर्देवैरभिमानिभिःसूर्याद्यैःसह । य त्रयस्मिन्नक्षरेब्रह्मणिसंप्रतिष्ठंतिसंप्रतिष्ठंते तदेतदक्षरंवेदयतेविजानातियःपुरुषः । सोम्येतिकस्यचित्संबुद्धिः । सउक्तप्रकारेणस र्वज्ञःसर्वंपरंब्रह्माविवेशैवाविष्टएवध्रुवमाविशत्येवेति ॥ ६ ॥ **इतिचतुर्थप्रश्नप्रतिवचनं ॥ ४ ॥** अथहैनंशैब्यः । एवमुक्तलक्ष

उप० । प्राणश्चविधारयितव्यंच ॥ ५ ॥ एषहिद्रष्टास्प्रष्टाश्रोताघ्रातारसयितामंतावोद्धाकर्ताविज्ञानात्मापुरुषः । सयोहवैतमच्छायमशरीरमलोहितंशुभ्रमक्षरंवेदयतेयस्तुसोम्यसर्वज्ञःसर्वंभवति । तदेषश्लोकः । विज्ञानात्मासहदेवैश्चसर्वैःप्राणाभूतानिसंप्रतिष्ठंतियत्र । तदेतदक्षरंवेदयतेयस्तुसोम्यससर्वज्ञःसर्वमेवाविवेशेति ॥ ६ ॥ **चतुर्थःप्रश्नः ॥ ४ ॥** अथहैनंशैब्यः

SGDF
Sri Gargeshwari Digital Foundation

णंपरंब्रह्म येनमंत्रेणोपासितव्यं उपासितंचयत्फलंप्रयच्छति तदिदानींवक्तुमयमुत्तरोग्रंथः । भगवन्नेतदेतेषुमनुष्येषु सयो यःक श्चित्प्रायणांतंप्रयाणपर्यंतं यावच्छरीरादुत्क्रमणंतावदितियावत् । ॐकारमोमित्याक्रियमाणंपरमात्मानमभिध्यायीत सर्वदार्चि तयेदोमितिमंत्रेणेत्यभिप्रायः । सपुरुषस्तेनध्यानेनकतमंलोकंजयति प्राप्नोतीत्येवंपृष्टवतेतस्मैसहोवाच । यदोंकारःॐमित्याक्रिय माणंवस्तु तदेतत्परंचापरंचब्रह्म । यस्मात्प्रणवोमुख्यतःपरमात्मनःप्रतिपादकः यस्माच्चतत्प्रतिमात्वेनामुख्यतोविरिंचप्रतिपादक श्च । तस्माद्विद्वान्प्रणवेनोपासकः एतेनैवोपासनाख्येनायनेन गमनसाधनेन । परापरब्रह्मणोरेकतरमन्वेतिप्राप्नोति । किंप्रणवो पासनमात्रेणैकतरमन्वेति । मैवं । यथावज्ज्ञात्वोपासनेनैवेत्युच्यते ॥ सइत्यादि ॥ अकारोकारमकाराख्यांशत्रययुक्तोहिप्र णवः । तत्रसउपासकोयद्येकमात्रमेकामात्रावाचिकायस्यतंपरमात्मानं प्रणवेनाभिध्यायीत । कामप्येकामेवमात्रांसम्यग्विदित्वा इतरेअविज्ञायेतियावत् । तर्हिसउपासकस्तेनैवध्यातेनपरमात्मनासंवेदित एहीतिसंबोधितइव देहपातानंतरंक्षिप्रमेवजगत्यांपृथि व्यामभिसंपद्यतेप्राप्नोति । जन्मेतिशेषः । कथंकीदृशंजन्मेति । तमुपासकमृचःऋग्वेदाभिमानिदेवताःपृथिव्यांमनुष्यलोकंमनु ष्यशरीरंद्विजाग्र्यलक्षणमुपनयंते प्रापयंति । सचतत्रजन्मनितपआदिसंपन्नस्तत्फलरूपंमहिमानमनुभवति।अथयदिद्विमात्रेणद्वे

उप० । सत्यकामःपप्रच्छ । सयोहवैतद्भगवन्मनुष्येषुप्रायणांतमोंकारमभिध्यायीत कतमंवावसतेनलोकंजयतीति । तस्मैसहोवाच । ए तद्वैसत्यकामपरंचापरंचब्रह्मयदोंकारः । तस्माद्विद्वानेतेनैवाययनेनैकतरमन्वेति । सयद्येकमात्रमभिध्यायीतसतेनैवसंवेदितस्तूर्णमेवजगत्यामभिसं पद्यते । तमृचोमनुष्यलोकमुपनयंते । सतत्रतपसाब्रह्मचर्येणश्रद्धयासंपन्नोमहिमानमनुभवति । अथयदिद्विमात्रेण

SGDF
Sri Gargeshwari Digital Foundation

मात्रेवाचिकेयस्यतेनपरमात्मनामनसिसंपद्यतेसंगतोभवतीति । तिसृषुप्रणवमात्रासु येकेवा द्वेमात्रेसम्यग्ज्ञात्वाऽन्यामविज्ञायप रमात्मानंचिंतयतीतियावत् । तर्हिसउपासकोयजुर्भिर्यजुर्वेदाभिमानिदेवताभिरंतरिक्षस्थंसोमलोकमुन्नीयते । नीतश्चसतत्रसोम लोकेविभूतिमैश्वर्यमनुभूयपुनरावर्तते । ततश्चयवते। यतएवंतस्माद्यस्तुपुरुषएतंपरंपुरुषंत्रिमात्रेणतिस्रोमात्राअपिसम्यग्विदित्वेति यावत् । ॐमित्येतेनैवाक्षरेणाभिध्यायीत सध्याताध्येयंपरमेश्वरमपरोक्षीकृत्य तेजोरूपेसूर्येसंपन्नस्तंप्राप्तोभवति । सूर्यप्राप्यचा सौयथापादोदरःसर्पस्त्वचाजीर्णयाविनिर्मुच्यते एवंखलुसध्यानीपाप्मनाप्रारब्धेनविनिर्मुक्तोभवति । विधूतपापश्चससामभिःसा माभिमानिदेवताभिःब्रह्मलोकंसत्याख्यमुन्नीयते । तत्रचएतस्मात्सत्यलोकपतेर्जीवघनाज्जीवसारात्सकलजीवोत्तमाद्धिरिंचात्तदु पदेशेनेतियावत् । परात्परमुत्तमोत्तमंपुरिशयंसकलजीवशरीरेषुशयितंपुरुषंपूर्णवासुदेवमीक्षते । पुनरभिवृद्धज्ञानोभवतीति । अत्रसम्यग्विदित्वाप्रणवेनभगवंतमुपासीनस्यविरिंचलोकप्राप्तिःफलमुक्तं तन्नोपपद्यते । देवान्देवयजोयांति मद्भक्तायांतिमाम पीत्यादिविरोधादित्याशंकांपरिहर्तुमाह ॥ प्रणवेनेति ॥ पुरुषमीक्षित्वाचतंप्राप्नोतीत्यत्रव्याख्यातव्यं । समाख्यावशादतोनवि

उप० । मनसिसंपद्यतेसोंतरिक्षंयजुर्भिरुन्नीयतेसोमलोकं ससोमलोकेविभूतिमनुभूयपुनरावर्तते । यःपुनरेतंत्रिमात्रेणोमित्येतेनैवाक्षरेणप रंपुरुषमभिध्यायीतसतेजसिसूर्येसंपन्नोयथापादोदरस्त्वचाविमुच्यतेएवंह्वैसपाप्मनाविनिर्मुक्तःससामभिरुन्नीयतेब्रह्मलोकं । सएतस्माज्जीवघना त्परात्परंपुरिशयंपुरुषमीक्षते ॥ २ ॥

भा० । प्रणवेनहरिंध्यायन्ब्रह्मलोकंसमेत्यच ।

SGDF
Sri Gargeshwari Digital Foundation

रोधइतिभावः । यएतच्छांतमितिमंत्राच्च । एतेनैकतरमन्वेतीत्यपिविवृतंभवति अपरंब्रह्मप्राप्यपरमप्यन्वेतीति । अत्रयद्विमात्रेणेत्यादिद्वितीयांतत्वेनविपरिणाम्यप्रणवस्यैवपरमात्मप्रतीकतयोपास्यत्वंपरैरुक्तं तदपिप्रणवेनहरिमित्युक्त्यैवपरास्तं । ओंकारमभिध्यायीतेतितत्रतद्द्वितीयाश्रवणात्त्यजेदेकंकुलस्यार्थइतिन्यायाद्विपरिणामोऽयुक्तइतिचेन्न । तृतीयायाअपिबहुशःश्रवणात् समाख्यात्वस्माकमतिरिच्यते । त्रिमात्रेणोमित्येतेनैवाक्षरेणेत्युपसंहारश्चगरीयान् । ज्ञानंचतुर्मुखात्प्राप्येत्यनेन पराञ्जीवघनादपिपरंपुरुषमीक्षतइत्येतदपव्याख्यानंप्रत्युक्तंभवतीति ॥ तदेतौश्लोकौभवतः ॥ तिस्रोऽकाराद्याःप्रणवमात्रा अनविप्रयुक्ताः विप्रयुक्ताअन्योन्यमसंबद्धाः एकैकशोज्ञाताः विप्रयुक्तानभवंतीत्यविप्रयुक्ताः नअविप्रयुक्ताअनविप्रयुक्ताः विप्रयुक्ताएवेत्यर्थः । अन्योन्यसक्ताः परस्परंयुग्मतयासंबद्धाः । ये के वा । द्वेद्वेज्ञात्वेतियावत् बाह्याभ्यंतरमध्यमासुतारमंद्रमध्यमरूपासूच्चारणक्रियासुप्रयुक्ताउच्चारिता मृत्युमत्योभवंति । एकैकामेववा द्वेवा येकेचित्सम्यक्ज्ञात्वा शेषमज्ञात्वो च्चैर्वानीचैर्वा मध्यममानेनवो च्चारिताःप्रणवमात्रा नापुनरावृत्तिफलंप्रापयंतीत्यर्थः । तासुसम्यक्प्रयुक्तासु तिस्रोपिसम्यग्ज्ञात्वोच्चारितासु सतीषुज्ञोज्ञानीनकंपतेनच्यवते । अपुनरावृत्तिफलंप्राप्नोतीति । एतदर्थविवरणार्थोंद्वितीयोमंत्रः । एकमात्राज्ञानपूर्वकोपासनादग्भिरेतंपृथि

भा० । ज्ञानंचतुर्मुखात्प्राप्यमुच्यतेनात्रसंशयः ॥ ५ ॥ प्र०

उप० । तदेतौश्लोकौभवतः । तिस्रोमात्रामृत्युमत्यःप्रयुक्ताअन्योन्यसक्ताअनविप्रयुक्ताः । क्रियासुबाह्याभ्यंतरमध्यमासुसम्यक्प्रयुक्तासुनकंपतेज्ञः ।

व्याख्यंमानुषंलोकमुपासकोनीयते । द्विमात्राज्ञानपूर्वकोपासनाद्यजुर्भिरंतरिक्षंतत्रत्यंसोमलोकंनीयते । यत्तत्कवयोज्ञानिनोवेद यंतेजानंतिज्ञापयंतिवा परात्परंब्रह्म यत्तच्छांतंसुखोत्कर्षसीमाभूमिरूपं अजरंजरादिवर्जितं परात्परंसर्वोत्तमं तं तद्ब्रह्मोंकारेणैवा यनेन अयनसाधनमोंकारंमात्रात्रयात्मकंसम्यज्ञात्वेतियावत् । सामभिरन्वेतीति ॥ ५ ॥ इतिपंचमप्रश्नप्रतिवचनं ॥५॥ अथ हैनंसुकेशाः । प्राक्प्राणादीनांशरीरिणश्चजाग्रत्स्वप्नसुषुप्तिषुपरमेश्वराधीनत्वमभिहितं । नतुमोक्षे । अतःसिंहावलोकन्यायेनमु क्तावपितेषांभगवदधीनत्वप्रदर्शनार्थउत्तरोग्रंथः । प्रष्टव्यार्थेतिशयितबुभुत्सांस्वस्यज्ञापयितुंपूर्ववृत्तांतकथनं । भगवन्हिरण्यना भोनामतः कोसलायांभवःकौसल्यः कस्यचिद्राज्ञःपुत्रोमामुपेत्यप्राप्यएनंवक्ष्यमाणंप्रश्नंप्रष्टव्यमर्थमपृच्छतापृच्छत् । हेभारद्वाज षोडशकलोनामकश्चित्पुरुषोस्तीतिसामान्यतोमयाश्रुतं तंषोडशकलंपुरुषंत्वंवेत्थविशेषतोजानासिकिं कोसौपुरुषः क्वचास्ते काना मषोडशकलाः कथंचतस्यषोडशकलत्वमित्यादि।यदिचजानासितं तर्हिमह्यंब्रूहीति । एवंपृष्टवंततंकुमारंपूर्ववयसिवर्तमानंहिरण्यना भमहमब्रुवं।अहमिमंत्वयापृष्टंषोडशकलंपुरुषंनवेदनजानामि।कुतः यद्यहमिमंपुरुषमवेदिष्यंविदितवानभविष्यं तर्हिकथंकस्माद्यो ग्यायतेतुभ्यंनावक्ष्यमिति । अतोनाहमिमंवेद । किंचयःपुरुषोनृतमभिवदति सएषसमूलःपरिशुष्यतिवै सर्वात्मनागतसारोभ

उप० । ऋग्भिरेतंयजुर्भिरंतरिक्षंसामभिर्यत्तत्कवयोवेदयंते । तमोंकारेणैवायतनेनान्वेतिविद्वान्यत्तच्छांतमजरममृतमभयंपरात्परंचेति ॥ ३ ॥ **पंचमःप्रश्नः ॥५॥** अथहैनंसुकेशाभारद्वाजःपप्रच्छ । भगवन्हिरण्यनाभःकौसल्योराजपुत्रोमामुपेत्यैनंप्रश्नमपृच्छत । षोडशकलंभारद्वा जपुरुषंवेत्थ । तंमह्यंब्रवीहीति । तमहंकुमारमब्रुवंनाहमिमंवेदयद्यहमिममवेदिष्यंकथंतेनावक्ष्यमिति । समूलोवाएषपरिशुष्यति

SGDF
Sri Gargeshwari Digital Foundation

वति । तेनार्जितंसमस्तमपिसुकृतंनश्यतीतियावत् । यतएवंतस्माज्ज्ञात्वापिनजानामीत्यनृतंवक्तुंदोषज्ञोहंनार्हामिनार्होभवामीत्ये
वमनेकप्रकारतःप्रत्यायितःसलज्जयातूष्णींकिमप्यवदन्रथमारुह्यप्रवव्राज । यथागतंतथागतवान् । एवंतदाप्रभृतिज्ञातव्यतया
ममहृदिवर्तमानंतंपुरुषंत्वात्वांपृच्छामि किमिति असौषोडशकलःपुरुषःक्वास्तेकश्चासौषोडशकलः । काश्चताःकलाःकथंचासौषोड
शकलःपुरुषइत्यादि इति एवंपृष्टवतेतस्मैसहोवाच । वक्ष्यमाणलक्षणैर्विष्णुरेवासौपुरुषइतिसेत्स्यतीत्यभिप्रायेणशिष्टस्यपरिहार
उच्यते ॥ इहैवेति ॥ हेसोम्ययस्मिन्पुरुषेएताःवक्ष्यमाणाःप्राणाद्याःषोडशसंख्याकाःकलाःसजीवस्यशरीरस्यभागाःप्रभवंति ।
यस्मादुत्पद्यंतेयस्मिंश्चप्रविष्टाभवंति । मुक्ताःसत्योयमाश्रित्यवर्तते । अनेनषोडशकलत्वंतस्यकथमितिपरिहृतंभवति । सपुरुषइहै
वशरीरेशरीरस्यांतरास्ते । नावश्यंतद्दर्शनायदूरंगंतव्यमित्यभिप्रायः । यस्मिन्नेताःषोडशकलाःप्रभवंतीत्युक्तंप्रपंच्यते ॥ सइत्या
दि ॥ सपुरुषःकल्पादौकलाःसृजानीतीक्षांचक्रेचिंतितवान् । पुनश्चकस्मिन्पुरुषेशरीरादुत्क्रांतेऽहमुत्क्रांतोभविष्यामि कस्मिन्वा
तत्रप्रतिष्ठितेऽहमपिप्रतिष्ठास्यामिप्रतिष्टो (ष्ठितो) भविष्यामि । कोनुमद्वशीकरणक्षमभक्तिज्ञानादिसंपन्नोयंनिमित्तीकृत्याहंक
लाःसृजानीत्येवमीक्षित्वा तादृशःप्राणएवेतिनिश्चित्य सपुरुषःप्राणंजीवकलाभिमानिनमसृजत् । प्राणात्तंप्राणंनिमित्तीकृत्य

उप० । योनृतमभिवदति तस्मान्नार्हाम्यनृतंवक्तुं । सतूष्णींरथमारुह्यप्रवव्राज । तंत्वापृच्छामिकासौपुरुषइति ॥ १ ॥ तस्मैसहोवाच ।
इहैवातःशरीरेसोम्यसपुरुषोयस्मिन्नेताःषोडशकलाःप्रभवंतीति। सईक्षांचक्रे कस्मिन्नवहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीति।

SGDF
Sri Gargeshwari Digital Foundation

श्रद्धां जीवस्यास्तिक्यनिष्ठामसृजत् । ततःखंवायुर्ज्योतिरापःपृथिवीत्येतानिशरीरोपादानभूतानिभूतानि इंद्रियंचक्षुरादि । प्रवृत्तावुपकरणं मनःप्रधानकारणं अन्नंतत्स्थितिकारणं तस्माच्चान्नादन्नंनिमित्तीकृत्यवीर्यंशरीरहेतुभूतं तपोजीवस्यज्ञानादिहेतुतयासुखसाधनं मंत्राःऋगादिवेदाःसम्यग्ज्ञानादिहेतवः कर्मपुण्यापुण्यलक्षणंसुखादिनिमित्तं लोकाःगोलकाःइंद्रियाश्रयभूताः । नामच देवदत्तादिकमित्येताःकलाःपुरुषेणसृष्टाइति । अत्रसप्राणमसृजत प्राणाच्छ्रद्धामित्यादौ अन्नाद्वीर्यमितिमध्ये लोकेषुसृष्टेषु सत्सुनामचेत्यंतेऽपिकथनेन पूर्वपूर्वोत्पन्नांकलांनिमित्तीकृत्योत्तरोत्तरकलापरमेश्वरेणसृष्टेतिसूचयति । एतासांचकलानां यथेत्यादिना जीवेनसहमोक्षेपुरुषप्राप्तिरुच्यते । नचासावुपपद्यते । कलानांजडत्वेनमोक्षासंभवादित्यतोऽत्रकलाशब्देनतदभिमानिदेवताविवक्षिताइतिभावेनव्याख्यानरूपांस्मृतिमुदाहरति ॥ कर्मेति ॥ इंद्रियेशाश्चसूर्याद्याइत्यस्यैवविवरणं ॥ चक्षुराद्यभिमानिनइति ॥ चक्षुषःसूर्यः श्रोत्रस्यदिश इत्येवंसूर्याद्यायथा(संभवं)संख्यंचक्षुराद्यभिमानिनोनतुसर्वेसर्वेषामिति । ननुरुद्रादयोमनोदेवताःक्वचिच्छ्रूयंते सत्यं तेपिभवंतीत्याह ॥ रुद्रइति ॥ सर्वेषांप्रभवाप्ययेत्यनेनपूर्वोत्पन्नानांपश्चादुत्पन्नान्सर्वान्प्रतिस्वाम्य

उप० । सप्राणमसृजतप्राणाच्छ्रद्धांखंवायुर्ज्योतिरापःपृथिवींद्रियंमनोन्नमन्नाद्वीर्यंतपोमंत्राःकर्मलोकालोकेषुनामच ॥ २ ॥

भा० । कर्मेतिपुष्करःप्रोक्तउषानामाभिमानिनी । लोकाभिमानीपर्जन्यःस्वाहावैमंत्रदेवता । तपोभिमानीवह्निश्चवरुणोवीर्यदेवता । अन्नस्यदेवतासोमोमनोनामानिरुद्धकः । इंद्रियेशाश्चसूर्याद्याश्चक्षुराद्यभिमानिनः । रुद्रोवींद्रःशेषकामौमनसस्त्वेवदेवताः । श्रद्धेतिवायोःपत्नीस्यात्सर्वेषां प्रभवाप्यया ।

SGDF
Sri Gargeshwari Digital Foundation

मस्तीतिसूचितं । तंज्ञात्वेत्यनेन अराइतिमंत्रोव्याख्यातोभवति । अत्र सप्राणमसृजत । प्राणाच्छ्रद्धामित्याद्युक्त्याकलानामुत्पत्तावयंयथोक्तएवक्रमइत्यन्यथाप्रतीतिःस्यात् । तांनिवारयति ॥ एतस्मादिति ॥ नकलानामुत्पत्तावयमेवक्रमोज्ञातव्यः । तथासत्येतस्मादितिमंत्रविरोधात् । तत्रमनसोनंतरमिंद्रियाणांततोभूतानांचजन्मश्रवणादित्यर्थः । एतद्वाक्यविरोधान्मंत्रएवकिं नान्यथाव्याख्यायतइत्यतआह ॥ नहीति ॥ कुतोनेत्यतआह ॥तदिति॥ प्रबलविशेषवचनसहकारिणामंत्रेणसामान्यवचनस्य बाधोयुक्तएवेतिभावः । अस्तुतर्हिइंद्रियमनोजन्मविषयेमंत्रस्यैतद्वाक्यबाधकत्वं अन्यत्रतु यथाश्रुतएवक्रमइत्याशंकांपरिहर्तुम शेषक्रमं विशेषवाक्यांतरेणदर्शयति ॥ विष्णोरिति ॥ प्राणोजातोऽवरश्चेत्यादियोज्यं रुद्रइत्युपलक्षणं । पूर्ववाक्योक्ताश्चग्राह्याः । एवमिंद्रइत्यपि । तेषुचयथायोग्यमुत्पत्त्यादि। तस्यसकाशात् । वरुणोवीर्यदेवता । ततःसृष्टस्ततउत्पन्नः । अग्निस्तपोभिमानी मरुद्भूतवायुदेवता । पावकाख्यस्तेजोदेवता । ततोमरुदुत्पत्त्यनंतरं । तस्मान्मरुतोजातःपर्जन्योलोकाभिमानी । नकेवल

भा० । तस्माश्चकारणंप्राणःसर्वेषामुत्तमोत्तमः । तस्मापीशःकारणंचवासुदेवःपरोऽव्ययः । नतस्यसदृशःकश्चित्कुतएवोत्तमोभवेत् । तंज्ञात्वामुच्यतेजंतुर्विदित्वैवंपरात्परमितितत्वविवेके । एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच । खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणीतिमंत्रोक्तएवक्रमः । नहींद्रियेभ्योमनःपश्चात् । तत्प्राक्च्छ्रुतेश्चेतिभगवद्वचनं । विष्णोःप्राणस्ततःश्रद्धातस्मारुद्रोमनोभिधः। तस्मादिंद्रस्त्विंद्रियात्मातस्यसोमोन्नदेवता । ततश्चवरुणःसृष्टस्तस्मादग्निस्ततोवरः । आकाशदेवताविन्नस्ततोवायोःसुतोमरुत् । तस्मादग्निःपावकाख्यःप्रथमोग्नेःसुतस्ततः । ततःपर्जन्यउद्भूतःस्वाहातोमंत्रदेवता । उदात्मकोबुधस्तस्याउषानामात्मिकाततः । ततःशनिःपृथिव्यात्माकर्मात्मापुष्करस्ततः ।

मेतेसंसारेक्रमवंतः । किंतर्हिमोक्षेपीत्याह ॥ क्रमादिति ॥ यथाप्राणादीनांश्रद्धादिभ्यउत्तमत्वमात्रं नतथाप्राणाद्विष्णोरित्याह ॥ नित्यमुक्तइति ॥ ततस्तेभ्यःसर्वेभ्यःप्राणादपि । अत्रोक्ताएवभूतदेवताःपूर्ववाक्येपिग्राह्याः । यस्मिन्नेताःषोडशकलाःप्रभवंतीतिकलानांमुक्तौपरमपुरुषाश्रयत्वमभिधाय यथेत्यादितद्विवरणवाक्ये सदृष्टांतंपुरुषैक्यमुच्यते । यथालोकेइमानद्यःस्यंदमानाःस्रवंत्योगच्छंत्यइतियावत् । समुद्रायणाःसमुद्रगमनस्वभावाः । समुद्रंप्राप्यास्तंस्वरूपतिरस्कारंगच्छंति । तासांचभिद्येते विनश्यतः । नामरूपेगंगायमुनाइत्यादिलक्षणे । तद्भेदे समुद्रइत्येवंप्रोच्यतेतदुदकलक्षणंवस्तु । एवमेवास्यपरिद्रष्टुर्जीवस्येमाः षोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तंगच्छंति । तासांचनामरूपेप्राणइत्यादिरूपेभिद्येते । नाशेचनामरूपयोर्यदनष्टंचैतन्यंतत्पुरुषएवेत्युच्यतेविद्वद्भिः । ततःसएषजीवोकलोऽमृतोभवतीति । तदेतत्कथमित्यतोमुक्तेश्वरभेदस्यात्रानुपलभ्यमानत्वाद्यस्मिन्नितितदुक्तिरयुक्तेतिशंकापरिहाराय भेदएवसमर्थ्यतइतिभावेनाह ॥ समुद्रइति ॥ समुद्रेपुरुषेइतिसप्तमीनप्रथमेत्यर्थः । तत्कुतइत्यतआह ॥ भिद्येतेइति ॥ समुद्रंप्राप्तानांनदीनां पुरुषंप्राप्तानांकलानांच परस्परंसमुद्रादेश्च विविक्तनामरूपवत्त्वस्योक्तत्वात् । प्रथमांतत्वांगीकारेतद्विरोधःस्यात् । नहिनद्यादीनांसमुद्रादिभिरैक्यं विविक्तनामरूपवत्त्वंचेतियुज्यते । अतःसप्तम्यंतत्वमे

भा० । क्रमात्प्रत्यवराह्येतेमुक्ताःसर्वगुणैरपि । नित्यमुक्तस्ततोविष्णुःप्राणादप्युत्तमोत्तमइतिच ।

उप० । यथेमानद्यःस्यंदमानाःसमुद्रायणाःसमुद्रंप्राप्यास्तंगच्छंति भिद्येतेतासांनामरूपे समुद्रइत्येवंप्रोच्यते ।

भा० । समुद्रइत्येवंप्रोच्यते । पुरुषइत्येवंप्रोच्यते ।

SGDF
Sri Gargeshwari Digital Foundation

वेत्यर्थः । तर्हिभिद्येतेतासामित्यादिवाक्यस्यकथंयोजनेत्यतआह ॥ अज्ञैरिति ॥ अस्तंगच्छंतीत्यस्यानुवादोअज्ञैरिति । तथा हिवक्ष्यति । तथाचेयमक्षरयोजना । नद्यःसमुद्रंप्राप्यास्तमदर्शनंगच्छंति । अज्ञानामदर्शनंगतानामपितासां समुद्रेस्थितानांना मरूपेभिद्येतेविविक्तेएवतिष्ठतइत्येवंविद्वद्भिःप्रोच्यते । एवंकलाअपिजीवमोक्षकालेमुक्ताःपरमपुरुषंप्राप्यादर्शनंगच्छंति तथापिपुरु षेस्थितानांतासांनामरूपेविविक्तेएवतिष्ठतइत्येवंविद्वद्भिःप्रोच्यते । ततश्चकलादेवतासुमुक्तिंगतासु सएषजीवोनष्टाचेतनकलोभ वति । ततएवामृतोभवति । कलानिमित्तंहिमरणमस्येति । ननुभिद्येतेइत्यस्यनाशोर्थोमयांगीक्रियते । तत्कथंप्रथमांतत्वेएतद्वि रोधइत्यतआह ॥ नचेति ॥ दृष्टएवघटोभिन्नइत्यादौनाशेचप्रयुज्यमानोभेदशब्दइत्यतआह ॥ घटादावपीति ॥ बहुभावे अ वयवविभागे कथंतर्हिभिन्नोघटइतिप्रयोगेनष्टइतिप्रत्ययःश्रोतृणामित्यतआह ॥ नाशस्त्विति ॥ भिन्नशब्दाज्ज्ञातावयवविभा गेनश्रोत्रा यस्यावयवविभागस्तस्यनाशमंतरेणासावनुपपन्नइति अनुमानेनैवनाशोवगम्यते । नशब्दशक्त्येत्यर्थः । अस्तुतर्हिप्रकृते

भा० । भिद्येतेतासांनामरूपे । भिद्येतेचासांनामरूपेइत्युक्तत्वात् । अज्ञैरनवगतान्यपिसमुद्रेस्थितानांनदीनांविष्णौस्थितानांमुक्तानांचभि न्नान्येवनामरूपाणिसंत्येवेत्यर्थः ।

उप० । एवमेवास्यपरिद्रष्टुरिमाःषोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तंगच्छंति । भिद्येतेचासांनामरूपेपुरुषइत्येवंप्रोच्यते । सएषोकलो ऽमृतोभवति ॥ ३ ॥ तदेषश्लोकः । अराइवरथनाभौकलायस्मिन्प्रतिष्ठिताः । तंवेद्यंपुरुषंवेदयथामावोमृत्युःपरिव्यथाइति ॥

भा० । नचभेदशब्दोनाशेप्रयुज्यमानःकापिदृष्टः । घटादावपिबहुभावएवभेदशब्दःप्रयुज्यते । नाशस्त्वर्थतएवावगम्यते ।

SGDF
Sri Gargeshwari Digital Foundation

प्यर्थतएवनाशावगमः । नहिशब्दशक्त्यैवेतिप्रतिज्ञातमस्माभिरित्यतआह ॥ नचेति ॥ कुतोनेत्यतआह ॥ नहीति ॥ नहि घटादाविवनामरूपयोरवयवविभागोभेदशब्देनोच्यतइतिवक्तुंशक्यते । येनतदनुपपत्त्यानाशंनिश्चिनुमः । अद्रव्यत्वात् । नह्यनुपपद्यमानादर्शनेप्युपपादकेबुद्धिर्भवतीत्यर्थः । यतएवंभेदशब्दः शक्तितोर्थतश्च ननाशवाचकोऽतउक्तरीत्यापृथक्त्वपरएव । तत्तश्चैतद्विरोधात्समुद्रादिपदंसप्तम्यंतमेवेति । उपसंहरति ॥ अतइति ॥ किंच तदेषश्लोकः अराइवेत्युक्तार्थसंमतित्वेनोदाहृतमंत्रेकलानांपरमपुरुषाश्रयत्वस्योक्तत्वात् । अत्रापिपुरुषपदंसप्तम्यंतमेवेत्याह ॥ अराइति ॥ पुरुषशब्दस्यसप्तम्यंतत्वोपपादनमुपसंहरति ॥ अतइति ॥ अरारथनाभाविवकलाःप्राणाद्यायस्मिन्प्रतिष्ठितास्तंवेद्यंपुरुषार्थकामैर्ज्ञातव्यंपुरुषंवासुदेवंवेदयथाःजानीध्वं हेशिष्याइतिकस्यचिद्वाक्यं । ततश्चमृत्युःसंसारोवोयुष्मान्मापरिव्यथाःमापरिव्यथयतु । परमपुरुषाज्ञाने संसारव्यथाभवेत् । साभवतांमाभवत्विति । एवंचेत्समुद्रंप्राप्यास्तंगच्छंतीतिपुरुषंप्राप्यास्तंगच्छंतीतिस्वरूपतिरस्कारोक्तिःकथमित्यतःप्राक्सूचितमेवार्थंविवृणोति ॥ अस्तगमनंत्विति ॥ एवंसमर्थितंवाक्यार्थवाक्यांतरसमाख्ययापिसमर्थयते ॥ प्राणादयइति ॥ ननुमदुक्तार्थेपि यथानद्यःस्यंदमानाःसमुद्रेस्तंगच्छंतिनामरूपेविहाय ॥ तथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यमि

भा० । नचात्रार्थतोपिनाशोवगम्यते । नहिनामानिरूपाणिचकपालवद्बहुधाभूतानितिष्ठंति । अतोभिद्येतेइतिपृथक्त्वमेवोच्यते । अराइवरथनाभौकलायस्मिन्प्रतिष्ठिताइतिवाक्यशेषाच्च । अतःपुरुषेभिन्नानिभिन्नानिनामरूपाणिप्रतिष्ठितानीत्येवार्थः । अस्तगमनंत्वादित्यवदज्ञानामविज्ञेयत्वमेव । प्राणादयःकलायस्मिन्मुक्तानित्यंप्रतिष्ठिताः ॥ पृथक्पृथङ्नामरूपैर्नमस्तस्मैपरायतइतिसत्तत्वे ।

SGDF
Sri Gargeshwari Digital Foundation

तिमंत्रसमाख्यास्ति । अत्रहिमुक्तस्यनामरूपाद्विमुक्तत्वमुच्यतइत्यतआह ॥ **नामरूपादिति** ॥ वीत्युपसर्गस्यवर्जनार्थतायाःवि
प्रियादिशब्देदर्शनादत्रापितथात्वेनविमुक्तइत्यमुक्तत्वमुच्यतइत्यर्थः । नचसमासानुपपत्तिः । मुक्तशब्दस्यभावप्रधानत्वोपपत्तेः ।
भावेवायंक्तप्रत्ययः । ततश्चविगतंमुक्तंमुक्तिरस्मादित्यतिचतुरश्रं । एवंसतिपूर्वार्धोक्तदृष्टांतविरोधःस्यात् । तत्रनामरूपेविहाये
ति तद्धानस्योक्तत्वादित्यतआह ॥ **नामरूपेइति** ॥ पूर्वत्र पूर्वार्धेपिअविहायेत्येवयोज्यं । नतुविहायेतीत्यर्थः । कुतएवंपूर्वोत्त
रार्धयोजनेत्यतआह ॥ **अनंतमिति** ॥ विश्वेदेवाइतिरूपस्यानंतत्वमुच्यते।मोक्षेपिभेदश्रुतिबाहुल्याच्चैवमेवार्थइत्याह॥यत्रेति॥
श्रुतिविरोधादेव मणीवादिवदत्राप्यप्रगृह्यत्वंवक्तव्यं । एतत्प्रश्नप्रतिवचनार्थंप्रसंगादुपसंहरति ॥ **अतइति** ॥ एवंसपिप्पलाद
स्तेभ्यस्तत्वमुपदिश्य तान्भरद्वाजादीन्प्रत्युवाच । किल । एतत् उक्तलक्षणंपरंब्रह्म अहमेतावदुक्तमात्रमेववेद नातःपरंमया
विदितमस्तीति । अस्मदादयस्तदेकदेशविदएव । नत्वपरिमितविदइतिभावः । एवमुपदिष्टास्तेमुनयस्तमाचार्यमर्चयंतःप्रणामा

भा० । नामरूपाद्विमुक्तइत्यनेनापि नामरूपामुक्तत्वमुच्यते। विप्रियइत्यादिवत्। नामरूपेअविहायेतिचपूर्वत्र। अनंतंवैनामानंतावैविश्वेदे
वाइतिनामरूपयोरनंतत्वंहिश्रुतिर्वक्ति । यत्रपूर्वेसाध्याःसंतिदेवाः । सतत्रपर्येतिजक्षन्क्रीडन्त्रममाणः । सोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चिता ।
ऋचांत्वःपोषमास्तेपुपुष्वान्गायत्रंत्वोगायतिशकरीष्वित्यादेश्च । अतःसर्वमुक्तेभ्योप्युत्तमोत्तमःपरिपूर्णोनारायणइतिसिद्धं ।

उप० । तान्होवाचएतावदेवाहमेतत्परमंब्रह्मवेदनातःपरमस्तीति ।

दिनापूजयंतइदमूचुः । भगवंस्त्वंहिनःपिता निरुपाधिकोपकारकः । कथंयस्त्वमस्माकंअस्मानविद्यायाःपरंपारंतारयसि अतारयः । कोहिनामैवमुपकुर्यादिति । एवमाख्यायिकांसमाप्यवेदपुरुषःशिष्यशिक्षार्थमाह ॥ **नमःपरमऋषिभ्यःपिप्पलादादिभ्यइति** ॥ द्विर्वचनमादरार्थइति । अतएवभाष्यकारोप्यंतेचभगवत्प्रणामंनिबध्नाति ॥ **नमइति** ॥ वचनप्रसूनमालाजयतीर्थाख्येनभिक्षुणारचिता ॥ ध्रियतांहृदयेसदयेकमलामहिलेनपुरुषेण ॥ ७ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्यषट्प्रश्नोपनिषद्भाष्यस्यविवरणंजयतीर्थभिक्षुविरचितंसंपूर्णं ॥ ७ ॥ श्रीकृष्णार्पणं ॥ ७ ॥

उप० । तेतमर्चयंतस्त्वंहिनःपितायोस्माकमविद्यायाःपरंपारंतारयसीति । नमःपरमऋषिभ्योनमःपरमऋषिभ्यः ॥ ४ ॥ ६ ॥ **इतिश्रीषट्प्रश्नोपनिषत्समाप्ता** ॥

भा० । नमोनमस्तुहरयेप्रेष्ठप्रेष्ठतमायते ॥ परमानंदसंदोहसांद्रानंदवपुष्मते ॥ ६ ॥ **इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितंषट्प्रश्नोपनिषद्भाष्यंसंपूर्णं** ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ षट्प्रश्नटीकासंपूर्णा ॥

SGDF
Sri Gargeshwari Digital Foundation